CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 856

Title Saubhāgya Varddhanī

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 856 Subject: Kāvya.

Title: Saubhāgya varddhanī.

Author: Śankarācārya, Kaivalyāśrama. Scribe: Nīlakṛiṣṇa

Date of the work: — Date of the Ms.: V.S. १९२०

Place of the work: — Place of the Ms.: —

Size: 7.9" by 3.9" Extent: 72 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

सौंदर्यलहरीनीटीकासंपूर्णपत्र७२

॥श्रीगणेशाय नमः॥ शाद्यायमानतिमिरावलिसेव्यमानं निस्पंदमानतिमिरोर्ध्वगमा
ध्यरागं॥ विश्वाधिकारतरणिं तरुणार्कशोणं वंदे ध्यनागनरयोर्वियोगयोगं॥१॥ कुं
डलितकुंतलनालीकंरिकाङ्गत्यमानेन वन्नानो [illegible] मिवशोभमानं वंदे सीमं
तरागमंबायाः॥२॥ रमणं वामदेहाय रजताचलवासिने। रमाधरेंद्रचापाय
रमाकांतेषवे नमः॥३॥ श्रीशंकराचार्यकृते स्तवे स्मिन्। टीकां चिकीर्षोर्मम मं
दबुद्धेः॥ विदूषकस्येव वचो स्तु युष्मद्धासाय संतोस्मि तयापि धन्यः॥४॥ भगवा
न् परमकारुणिकः शंकरावतारः शंकराचार्यः शिवशक्त्योरभेदं ज्ञापयितुं स
कलप्रपंचसाक्षिणा ब्रह्मा विनान्यत् न किंचिदस्तीति द्वारा माद्यकादिमं
त्रानुद्धरति॥ शिवः शक्त्येति॥ शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पंदितुमपि॥ अतस्त्वामाराध्यां हरिहरवि १
रिंच्यादिभिरपि प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥१॥ जन्ममर

णाद्यनेकक्लेशासंबंधैरुपचीयमानतापत्रयरूपाऽमंगलाभावाच्छिवः सदा मंगलरू
पश्चिद्विलाससमुल्लसितपरमानंदनिर्भरः॥ एतादृश्या शक्त्या कर्तुमकर्तुमन्यथाक
र्तुं प्रभवंत्या यदि युक्तो भवति तदा प्रभवितुं शक्तो भवति सर्वोत्कृष्टो भवतीति याव
त्। विपक्षे बाधकमाह। न चेदेवं देवः दीव्यतीति देवः। अप्रतिहतक्रीडः। स्पंदितुं च
लितुमपि न कुशलः न क्षमः। अतः कारणात्त्वामाराध्यां हरिहरविरिंच्यादिभिर
पि उपासनीयां। आदिशब्देन मनुचंद्रादयः। तदुक्तं मानसोल्लासे। विष्णुः शिवः र
सुरज्येष्ठो मनुश्चंद्रो धनाधिपः। लोपामुद्रा तथागस्त्यः स्कंदः कुसुमसायकः॥
सुराधीशो रोहिणेयो दत्तात्रेयो महामुनिः। दुर्वासा इति विख्याता एते विद्यो
पासकाः॥ ज्ञानार्णवेपि॥ मनुश्चंद्रः कुबेरश्च मन्मथस्तदनंतरं। लोपामुद्रा
तथागस्त्यः स्कंदो विष्णुस्तथा शिवः। दत्तात्रेयो मुनिः शक्रो दुर्वासाश्चत्रयोदश
उपासते महाविद्यां द्वादशांका स्तवानघ। त्रयोदशाक्षरां विद्यां दुर्वासा पा

न्तितां प्रियेइति। प्रणंतुं नमस्कर्त्तुं स्तोतुं। अकृतपुण्यः कथं प्रभवति समर्थो भवति।
एतावतास्टष्टिस्थितिसंहृतिकर्तॄणां हरिहरादीनां स्वस्वकृत्येषु शक्त्या विनाक
र्तुमशक्यत्वात्। सृष्ट्यादौ त्वमेव हेतुः। त्वत्परतंत्रास्तेपि। तदुक्तं मार्कंडेये। सृष्टि
स्थितिविनाशानां शक्तिभूते सनातनि। गुणाश्रये गुणमये नारायणि नमोस्तु
ते। इति। एतादृश्यास्तवानेकजन्मार्जितसुकृतराशिरेव प्रणामस्तुतिषु आरूप
ध्यानेषु च अधिकारी भवति नान्यः। तदुक्तं शारदातिलके। पूर्वजन्मकृतैः पुण्यैर्
वेमां परदेवतां। पूजयेदागमोक्तेन विधानेन समाहितः। इति। तथा च ये न्ये त्वदति
रिक्ता देवा गणेशप्रभृतयो भक्तेभ्यो भुक्तिमुक्तिं च ददते ते पि शक्तिरूपया त्वये
वानुगृहीता उपासकेभ्य उपासनानुरूपाणि फलानि ददते। त्वमेव फलदा
त्री सर्वत्र। येन केनापि प्रकारेण या काचिद्देवता उपास्यतां। सा तु त्वदुपासने २
वेति पर्यवस्यति। तदुक्तं मानसोल्लासे। येपि ब्रह्मादयो देवा भक्तेभ्यो वरदायिनः।

त्वद्रूपां शक्तिमासाद्य ते भवंति वरप्रदाः। तस्मात्त्वमेव सर्वकर्मणां फलदात्रीति।
एतादृक्स्वरूपायास्तव शिवस्यापि विना भावो न भवतीति। परमार्थतः शक्तिशक्तिम
तोरभेद इति तात्पर्यार्थः। तदुक्तं कूर्मपुराणे। शक्तिशक्तिमतोर्भेदं वदंत्यपरमार्थ
तः। अभेदमनुपश्यंति योगिनस्तत्त्वचिंतकाः इति। ननु वा त्रापारमार्थिकं भेदमा
दाय यथा तंतुमान्पट इति। शिवः शक्तियुक्तः प्रभवति न शक्तिवियुक्तः कदाचि
दपि। यया च सैव शक्तिः स एव शिवः। स एव शिवः सैव शक्तिरित्युपासकानां वा
सनाभेदे न शिवः शक्तिरिति भेदकल्पना। यथा चित्रविशेषे गजवृषनारीकुं
जरादीनां वासनाभेदेन कदाचिद्गजप्रतीतिः कदाचिद्वृषप्रतीतिरित्यादि। त
दुक्तं परिमले। आलेख्यविशेषे यथा गजवृषभयोः प्रतिभासः। तथैकस्मिन्न
र्थे शिवशक्तिविभागकल्पनं तु मे इति। अथ वा शिवः अकारः शक्त्या युक्तः श
क्तिरेकारः। मादनं तदधः शक्ति स्तवं ते बिंदुमालिनीति चतुःशत्यां सवे

कारः।अकारैकारद्वयद्वारात्मकः।तेनाक्षरद्वयमेवदृश्यते।नघकन्नवर्णव्यत्यये
न।अकारैकारयुक्तोयदिनभवतितदाप्रजल्पितुंशक्तोनभवति।नन्वेवंदेवोपि
नस्पंदितुमपिकुशलः।नतालुजोष्ठपुटस्पंदनेनोच्चारणयोग्योपिनभवति।अ
नुअदइतिव्यंजनमात्रावशेषात्।अतस्त्वामाराध्यामित्यतार्थः।एवंवद
वा।एतावतात्वयावशीकृतः।शिवस्त्वन्मयएवपरमार्थतोनभेदोस्तीतिना
वः।तदुक्तंविद्गगनचंद्रिकायां।अवतावकपदद्वयार्थकस्त्वन्मयोनभवतीना
त्रविस्मयः॥यस्त्वयैवविवशोवशीकृतःशक्तिरेवसमस्तच्छिवःस्वयमिति।
हरिरपित्वच्छक्तिमयएव।तदुक्तंमातृसोल्लासे।हरत्यक्तोहरिर्हरिरेवतवां
बिके।स्फुरच्छक्तिःपुनरन्यद्परःसंधियोगतः।संधियोगतइतिप्रकटोर्थः।
श्लोकस्यतथापिगुरुमुखादवगंतव्यः।अथमातृकादिमंत्रोद्धारक्रमोर ३
हस्यायोच्यते।शिवःककारादिक्षकारांतोवर्णसमूहः।पंचत्रिंशद्वर्णात्मकः

समस्तव्यस्तरूपेणषट्त्रिंशत्तत्त्वात्मकः।शक्तिरकारादिषोडशस्वरसमूहः।षट्त्रिं
शत्तत्त्वात्मकोव्यंजनसमूहः।षोडशस्वररूपयाशक्त्यायदियुक्तोनभवतितदाप्रभवि
तुंवेदादिविद्यारूपेणशब्दार्थसृष्टिंस्पष्टीकर्तुंशक्तोनभवति।नचेदेवंदेवोनखलु
कुशलःस्पंदितुमपि।तात्वोष्ठपुटव्यापारस्तस्य।अतःकिंचित्करः।अतस्त्वामाराध्यां
हरिहरविरिंच्यादिभिरितिस्पष्टार्थः।एतादृशोपिशिवस्त्वन्मयएवमातृकारूप
त्वात्।मातृकातिरिक्तशब्दार्थसृष्टेरभावाच्च।शब्दार्थसृष्टिःसर्वाअर्थात्त्वदधीनेति
भावः।तस्माच्छिवशक्तिमयावर्णाःसर्वे।तदुक्तंशारदातिलके।विनास्वरैस्तुनान्येषां
जायतेव्यक्तिरंजसा।शिवशक्तिमयास्तस्माद्वर्णास्तेमनीषिणइति।मातृका
हृदयेपि।ककारादिक्षकारांतावर्णास्तेपिशिवरूपिणइति।समस्तव्यस्तरूपे
णषट्त्रिंशत्तत्त्वविग्रहाः।अकारादिविसर्गांताःस्वराःषोडशशक्तयः।नित्याःषो
डशकात्मानःपरस्परसमायुताः।शिवशक्तिमयावर्णाःशब्दार्थप्रतिपादकाः॥

शिवः स्वपराधीनोन स्वतंत्रः कदाप्यसौ। स्वशः स्वतंत्रा जायंते तेन शिवस्य कदाचनेति
मातृको द्धारस्वरूपोर्थः। अथ विद्या प्रासाद परोद्धारः। शिवो हकारः। तदुक्तं रुद्रयाम
ले। शक्तिः प्राणमयजीवस्थमंत्रोनादः शिवो रविः। कथ्यते इति संज्ञास्यु हकारस्य
शिवोदितास्ति। शक्तिः शक्तिकूटं। बालाविद्यायास्तृतीयमक्षरं। तदुक्तं त्रिपुरा
र्णवे। वाग्भवं प्रथमं बीजं कामराजं द्वितीयकं। तृतीयं शक्तिकूटाख्यं निगमै त्रि
तयाद्भुतं। इच्छंकुमारी विद्याया बीजत्रयमुदारितमिति। तयापुन्नोयादि नवतिन
दाप्रस्नविद्युशक्नोति। न चेदेवं देवः स्पंदितुमपि न कुशलः। तात्पर्यो स्फुट स्पंद
ने नव्यक्तीत्तवित्तुमसमर्थः। किं तु तन्मंत्ररूपतां प्राप्तं तु ज्ञानराशेः पूर्ववदेवयोज
नीयं। इति प्रासादपरोद्धारो रहस्यार्थः। अथानुत्तरमंत्रोद्धारः। शिवः अकारः। तदु
क्तं संकेतपद्धत्यां। अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिव इति। शक्तिर्विसर्गः। ४
तदुक्तं शिवदृष्टौ। अहं बिंदुर्विसर्गस्तु भावयोर्योगतस्परः प्रकाशितो नुत्तराख्या

वर्णो वर्णोघ्वनुत्तर इति। तदुक्तं शारदातिलके। बिंदुः पुमान्विसर्गः प्रोक्तः। सर्गः शक्तिर्नि
शाकर इति। तयास्तु क्तोयदि नवृत्तितदा प्रस्नवित्तुं शक्नो न वति। सर्ववर्णपदवाक्य
स्मृत्युत्तरत्वेन प्रकाशमानो भवति। साक्षान्निरतिशयानंदसुंदरचिच्छक्तिस
मवेतं ब्रह्मैव भवति। तथा च श्रुतिः। अहं इति ब्रह्मेति। न चेदेवं देवो भवति। देवता
रूपचिच्छक्तिविलासमात्रावात्। तदुक्तं वामिसुरा माय णे। नदेवः पुंडरीकाक्षो
न च देवस्त्रिलोचनः। आकारादि परिछिन्नमित वस्तु नित्तत्कुतः। अतस्त्रिमनना
तं देवमन्नं देव उच्यते। इति। स्पंदितुमपि न कुशलः। केवलं शून्याकारः पर्यवस्य
ति। तदुक्तं योगिनी हृदये। शून्याकारा द्विसर्गांता बिंदुप्रस्पंदसंविदः। प्रकाश
परमार्थत्वा स्फुरत्तालहरीयुतान्। प्रस्तुतं बिम्बलहरीमाहुः स्थानत्रयात्मक
मिति। आदि पर्वणि मदोनारतु। कूनस्पदातारमनुत्तरस्य निधिं निधीनां चतुर
नयानां। येनाद्रियंते गुरुमर्चनं। यं तेवे लोका न्विशत्यप्रविशानिति। अतस्त्वा

मित्यादि पूर्ववद्योजनीयं। हरिहरादयोपि अनुत्तरमेवोपासत इति तात्पर्यार्थः।
अथ वाग्हरिहरविरिंचिगायत्री। त्रिमूर्तिरूपत्वात्। तथा च याज्ञवल्क्यः। प्रातर्ब्र
ह्मस्वरूपास्यान्मध्याह्ने रुद्ररूपिणी। सायं विष्णुरूपेण गायत्री त्रायते त्वयादि
ति। गायत्र्यादिमंत्रैराराध्यां। एतावता गायत्र्यादयो मंत्रा वेदादिसकलविद्याः
किं बहुना यत्किंचिद्दृश्यं जातं जगत्। तत्र वर्तमानं वर्तिष्यमाणं सकलमपि
अनुत्तररूपस्वरप्रत्याहाररूपं। एतादृशानुत्तररूपिणीत्वात् ब्राह्मणं तु रस्त्री तु वा
कथमनंतपुण्यभाग्भवति। तदुक्तं शिवसूत्रे। प्रत्याहृताः स्वरादेर्विषोडशा
नुत्तरे मनौ। अकारस्य विसर्गेण संहायतस्य मेलनात्। सो किं कं वेदिकं चापि
यत्किंचिद्दृश्यं जातकं। अनुत्तरेणात्वेन सकलकवलीकृतमिति। इत्यनुत्तरोद्धारः
अथ वाग्वादिनीविद्योद्धारः। शिवो हकारः शक्त्यायुक्तः। शक्तिरूपाकारेण युक्तः। ५
शक्तिश्चासौ आचेतिकर्मधारयः। तेन ह्रींकारी वाग्वादिनी भवति। तदुक्तं मंत्र

पारायणांतर्गतवाग्वादिनीमंत्रोद्धारे विद्यार्थप्रकाशिकायां। अमृतं तोन ऊली
शस्त्रविद्यावाग्वादिनीमतेति। एवं चेत्संभवति। वाग्वादिनीविद्यारूपेण वेदादिस
मस्तविद्याद्योतको भवति। नचैवं हकारमात्रावशेषान्तदेवानां पि कुशलः स्यादि
त्यमपि तया स्त्रं भायमानः केवलं शोकमोहभयादिद्योतक एव स्यात्। अतस्तामि
त्यादि तत्रार्द्धस्पष्टं। इति वाग्वादिनीविद्योद्धारः। अथ शिवपंचाक्षरीपाशादित्र्य
क्षरविद्योद्धारः। शिवः शब्दः पति। शक्तिरेकारः। तेन चतुर्थीविभक्तिः। उं इत्यनेकजो
पे एइति। तत्र च इति। नम इति। शक्तिपुक्तो यदि स्यात्। तदुक्तं स्कंदपुराणे। प्रण
वो बीजमाख्यातं नमः शक्तिरुदीरिता। ऋषिः स्याद्वामदेवोस्य पंक्तिश्छंद उदाहृ
तं। पार्वतीवल्लभः साक्षाद्देवतात्र सदाशिवः। इति। न चैवं देवं देवास्यं दिक्षमपिन
कुशलः प्रातिपदिकमात्रावशेषान्नं च रूपतया फलदाना समर्थः स्यात्। अ
नस्तामाराध्यां। ई बिंदुरेफहकारेण सहशक्तिं भुवनेश्वरीं। हरिहरविरिंच्याः प्र

ण॰ वरेफककारास्तेषां विलोमयोजनेन अंऊंशाबीजं भवति। अत एव विरिंच्यादि
त्रिरित्युक्तं। हरिश्च हरश्च हरिहरौ। विरिंचिः सावादिश्च विरिंच्यादिः। हरिहरौ च वि
रिंच्यादयश्च हरिहरविरिंच्यादयः। तैः सहाराध्यां प्रणंतुं स्तोतुं वा कथमकृतपुण्यः
प्रभवति। अनेनात्यंतप्राधान्यमुक्तं। अयं मंत्रः इति सूचितं। तदुक्तं शारदातिलके।
प्रजाप्युक्ताइच्छं संपूजयेद्देवीं मायाद्यैः प्रवर्णैर्नवेत। इज्यते सकलैर्देवैस्तेज
सा नामकरोपरः। अनेनाधिष्ठितं गेहं निशिदीपशिखाकुलं। दृश्यते प्राणिनिःस्
वैर्मंत्रस्यास्य प्रभावतः इति। इति प्रथमश्लोकार्थः। प्रणंतुं स्तोतुं वा कथमकृतपु
ण्यः प्रभवतीत्युक्तं त्वया मां स्तोतुमकस्वरूपं मत्प्रभावं ज्ञात्वा स्तुतिः कार्या
किं मत्स्वरूपं ज्ञातं को वा मत्प्रभावो ज्ञात इत्यत्रोत्तरमाह॥ ॥तनीयांसं पांसुं त
व चरणपंकेरुहभवं विरिंचिः संचिन्वन् विरचयति लोकानविकलं। वहत्येनं ६
शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिं॥

॥२॥ तनीयांसं सूक्ष्मं तव चरणपंकेरुहभवं पांसुं रजःकणं विरिंचिः संचिन्वन् ए
कत्रीकुर्वन् विरचयति सृजति। लोकान् चतुर्दश भुवनानि। भवच्चरणप्रणामतः शिर
सि लग्नैः पांसुभिः संचितैः सर्वाल्लोकान् सृजति। अविकलं यथा भवति तथा निर्व्याजेने
त्यर्थः। एनं पांसुं शौरिर्विष्णुः शेषरूपः शिरसां सहस्रेण वहति। पंचाशत्कोटियोजन
विस्तीर्णं च भूमिरूपं तव चरणपंकेरुह मकरंदकणं कथमपि वहतीत्यर्थः। हरः ह
रतीति हरः। संहर्ता। संक्षुद्य चूर्णीकृत्य। भसितोद्धूलनविधिं भस्मस्नानविधिना भ
स्मोद्धूलनं करोति। पृथिव्यादिपंचभूतानि भस्मीकृत्य भस्मसात्करोतीत्यर्थः। त
था च स्नानमंत्राः। अग्निरिति भस्म। वायुरिति भस्म। ज्योतिरिति भस्म। जलमिति
भस्म। स्थलमिति भस्म। व्योमेति भस्म। सर्वं ह वा इदं भस्म। मनः। एतानि चक्षूंषि।
भस्मानीति। एतावता पृथिव्यादिपंचभूतानि तव चरणपंकेरुहमकरंदकणाः
।एतादृश्यास्तव स्वरूपं ज्ञातुं तु शिव एव समर्थः। को वास्मदादिर्वराक इति भावः।

तदुक्तं भगवता दत्तात्रेयेण योगिनां। यत्पादपद्ममकरंदकणा धरित्री। यन्मध्यवर्ति
तनिमा गगनं समग्रं। यद्गात्रसंगिकिरणत्रसरेणुरर्कस्तस्यास्तवांब वपुषो मि
तिरीषवेद्या इति। चरणएव पंकेरुहाणि। चरणाश्चत्वारः। शुक्लरक्तमिश्रानिर्वाणा
इति। तत्र सत्वप्रधानः शुक्लः। रजःप्रधानो रक्तः। तमःप्रधानो मिश्रः। गुणातीतोनि
र्वाणः। तेषां ध्यानस्थानानि शुक्लरक्तयोराज्ञाचक्रं द्विदलं। मिश्रस्य हृत्कमलं
निर्वाणस्य सहस्रदलं द्वादशांतस्थं। रक्तशुक्लयोर्ब्रह्मविष्णू ध्येयौ। मिश्रो रुद्रः।
निर्वाणस्तादात्म्य परमानंदनिर्भरः सदाशिवरूपः। सहस्रदलकमलकर्णिकारू
पचंद्रमंडलगलत्सुधानिरासेव्यमानस्तिमितनीयः। तथाचश्रुतिः। चरणं पवित्रं
विततं पुराणं येन पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अतिपाप्मान
मरातिं तरेम। लोकस्यद्वारमर्चिष्मत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत्। अमृ १
तस्य धारा बहुधा दोहमानं। चरणंनो लोके सुधितां दधात्विति। तथाच तत्र रक्तचरण

पंकेरुहजन्यं पांसुं रजोगुणं संचिन्वन् विरिंचिर्लोकान्सृजति। विष्णुः शेषनागः शुक्लच
रणपंकेरुहजन्यं पांसुं सत्वगुणं संचिन्वन् सहस्रशीर्षः पंचनारंशिरसां सहस्रेण वहति। रुद्रो
नीलग्रीवः हरो मिश्रचरणपंकेरुहजन्यं पांसुं तमोगुणं विधिसृष्टप्रपंचं चूर्णीकृत्य
त्मस्तिनोद्धूलनविधिं भजति। तदुक्तं दत्तात्रेयेण। अत्र मध्यगो विधिहरिनवरक्तशुक्लौ पा
दौ रजोमलगुणौ खलु सेव्यमानौ। सृष्टिस्थिती वितनुतो हृदये तृतीयमंघ्रिं भजन्नु
रतिविश्वमुग्रमुग्रः। अयं कपर्दी श्रीकंठउत्तमरः। अर्यंतवांब चरणं निरुपाधिबोधं
सांद्रानंदं शिवपदे सततं नमामि। इति। सांप्रदायिको रहस्यार्थो गुरुगम्यः। इति
द्वितीयपद्यार्थः॥ २॥ तर्हि मम स्वरूपं न जानासि नाप्यनुभवं अतस्त्वं सर्वविजि
ऽः दरिद्रः अत एव पूजायामसमर्थः अनवरतसंसारसक्तो जन्ममरणादिक्ले
शसमुद्रे मग्नो मां कथं स्तोष्यसीति प्रश्नोत्तरमाह॥ ॥ अविद्यानामंतस्ति
मिरमिहिरोद्दीपनकरी जडानां चैतन्यस्तबकमकरंदस्रुतिसिरा॥ दरिद्राणां

चिंतामणिगुणनिका। जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती॥३॥ न विद्यते वि
द्या येषां ते अविद्यास्तेषामंतस्तिमिरं। अनेकजन्मसंचितदुर्वासनासमासादितमहंममेतिबुद्धि
विजृंभिततापत्रयसंपादकमज्ञानं। तस्य मिहिरोद्दीपनकरी। तन्नाशकविद्योद्बोधिनीति।
तिमिरमिहिरद्वीपनगरीति केचित्पाठः। तत्र मिहिराणां द्वादशादित्यानां द्वीपोऽन्तर्मिलत्तत्र न
गरी। तेषां निवसतिः। द्वादशादित्या यत्र युगपदुदयं प्राप्नुवंति तादृशद्वीपनगरी। यत्र सर्वदा
परिभ्रमणं कुर्वतः सूर्यस्यापि गिरिकुहरकोटराद्यंतर्गततिमिरनाशकत्वं नास्ति। तदपेक्षया
पि अधिकप्रकाशकारिणीत्यर्थः। जडानां कर्तव्याकर्तव्यबुद्धिप्रकाशशून्यानां चैतन्यस्तबकः
उत्तरोत्तरश्लोकोत्तरबुद्धिचमत्कारव्यतिकरस्तस्य मकरंदश्रुतिः। सहृदयविद्वज्जनानंदसं
दोहसंपादकरसविशेषधारा तस्याः सिरा सरणिः। दरिद्राणां चिंतामणिगुणनिका। चिंता
मणिमयी माला। जन्मजलधौ। जन्मेत्युपलक्षणं। जन्ममरणादिबहुविधक्लेशसंचयवी ८
चिमालिनि निमग्नानां मुररिपुवराहस्य विष्णुरूपादिवराहस्य दंष्ट्रा उद्धारकरी भवती॥ एतादृ

र्यास्तवस्तुत्वे प्रपन्नस्य मम। अविद्याजडतादारिद्र्यजन्ममरणादिक्लेशसमुद्रमग्नं निजजनोन्म
ज्जनानि निःसंतिसर्वथेतिभावः। एतावता। बालार्ककोटिरुचिरां स्फटिकाक्षमालां कोदंडमिक्षु
जनितं स्मरपंचबाणान्। विद्यां च हस्तकमलैर्दधतीं त्रिनेत्रां ध्यायेऽममस्तजननीं नवचं
द्रचूडामिति। कामराजमातृकादेवतास्तुचिंता भवति। आदौ श्रीविद्योपासकानां कामराज
मातृकान्यासस्यावश्यकत्वात्तस्या ध्यानं सूचितं। अथवा त्रयाणां देवानां पुरा त्रिपुरेति वा
चवीजस्य त्रिपुरारूपतया उक्तत्वात्। तदेव बीजं सूचितं। तथाहि ऋग्वेदसामवेदयो
रादिवर्णौ अकारौ यजुर्वेदस्यादिवर्ण इकारः। सामवेदादिभूतावर्णेन यजुर्वेदादिवर्ण
स्य सहसंधौ कृते एकारो भवति। ऋग्वेदाद्यकस्य एकारेण सह संधौ कृते ऐकारो भवति।
तेनार्द्धेन्दुनाम्ना सहितः स वाग्भवो भवति। तदुक्तं कादिमते। अकारादिः सामवेद ऋग्वेदस्तत
दादिकः। यजुर्वेद इकारादिस्तेषां संयोगतः श्रुतिः। श्रुतिरेकारः। तन्निष्पत्तिश्च शुद्धत्वं प्रा रे
प्रोक्ता वर्णोधरक्रमात्। विलिख्य योजयेत्सूर्वं शाब्दशास्त्रानुसारतः। गुणसंख्याक्रमपूषो
न्तत्स्तेनापरं तथा। तद्विसंध्या सामयुंज्यादित्युक्तत्वं श्रुचेव क्षुः। तेनाक्षरत्रय्या विद्याका

उद्धारतः

र्दिका

कारणपोगतश्च बिंदुसर्गात्मनोरैक्यंरूपत्वादावयोर्वपुः। तेन बीजेन विश्वात्मरूपा सा स
म्यगीरितेति। प्रथमाकारोऽविद्यानिवर्त्तकः। द्वितीयो जडतानिवर्त्तकः। इकारः कामितफलप्र
दः। अर्द्धेन्दुः कैवल्यप्रदः। तेन वाग्भवरूपताप्रतिपादिता परदेवतायाः। यदुक्तं त्रिपुरार्णवे।
द्वैतस्याज्ञानमज्ञानाज्जडिमानमतः पुनः। इतः कामानवितनुते कैवल्यं कलया विधोः। वाग्भ
वं प्रथमं बीजं वेदानां पुरतो यतः। त्रिपुरासंज्ञयान्नदेव्या रूपा विश्वविग्रहेति। वाच्यवाचकरू
पेण व्याप्नोसि मितवैभवमिति। यदि स्तौति कर्तुं प्रभवतोसि। नमस्कृत्या किमदन्यादेवताह
रिहरगणेशादयः। प्रसन्नतो वराभयंकराः संतिताः सांस्तुत्या समीहितं न विष्यतीत्याह॥ ॥
त्वदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया॥ भ
याञ्चातुं दातुं फलमपि च वांछासमधिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ॥४॥
श्लोकार्थः स्पष्टः। सम्यगुक्तं। वराभयकरास्त्वं न भवसि। वराभययोः तत्संत्यत्राणसमी
हितफलवितरणं च। एतद्द्वयमपि तव चरणावेव दातुं निपुणौ। त्वदन्यदेवते पुनर्दाना
ःत्रि भिवराभयादानयमात्वंतथाभिनयो नास्ति। किंचान्यदेवतगणा उपासिताः वरेणश

रीरपोषणेन यावद्वांछितं तावदेव ददते। तव चरणौ वांछितादप्यधिकं वितरतः। यतस्त्वं लोकानां
शरण्यः। येप्यन्यदैवतगणास्तेषामपि त्वमेव शरणं। ते तु तव प्रतिदिनमुत्पत्तिप्रलयाभ्यामव
सीदंति। तस्मात्तवस्तुतिर्निष्फलास्ति द्विधायिनां तिमावः। तदुक्तं कमलकृतौ। ईषत्त्वभावकलुषाः कु
तिनामसंतिब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः। एकः स एव जननि स्थिरसिद्धिरास्ते यः पादयो
स्तव सकृत्प्रणतिं करोति। इति चतुर्थः॥ तर्हि मम प्रभावः कः उत्कृष्टः यदृष्टांतेन नमस्कृतिः आरब्धे स
तत्राह॥ ॥हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं पुरा नारी भूत्वा पुररिपुमपि क्षोभम
नयत्। स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनीनामप्यन्तः प्रभवति हि मोहाय महतां।
॥५॥ विष्णुस्त्वां प्रणतजनसौभाग्यकरीं समाराध्य पुरा अमृतमथनानंतरं दृष्टमागतं येन रू
पेण दानवा मोहिताः स्तवनरूपं द्रष्टुं इच्छेदमिति। दृष्ट्वा तं मदनारिं नारायणीरूपं प्रकटीकृत्य
क्षोभमनयत्। मदनपरवशं कृतवान्। येन स्मर्त्तव्यतां नाम प्रापितः स्मर इति नाम प्राप्तवा
न् सोपि पुरारतिनयनलेह्येन वपुषा प्राप्तविग्रहेण महतामपि मुनीनां विश्वामित्रगौतमा
दीनां मनसो मोहाय प्रभवतीति प्रकटोर्थः। गुप्तार्थस्तु। हरिस्त्वां हे प्रणतजनसौभाग्यजननि

।ई इति तुरीयवर्णरूपां आराध्य। अग्रे वक्ष्यमाणप्रकारेण भावयित्वा नारीरूपमासाद्य पुर
रिपुमपि क्षोभमनयत्तत्स्वरूपमासाद्येत्यर्थः। यत्किंचित्स्त्रीणां न नार्यामदनारेः क्षोभकरणं
न संभवतीत्यतः एतावता षट्कूटया विद्यया त्वामुपास्य कामकलाभावनया तत्स्वरूपं प्रा
प्य मदनारिमपि मोहितवानिति भावः। षट्कूटविद्या तु। लोपामुद्रोपासितविद्या नंदिकेश्व
रोपासितविद्या च भवति। तत्र तु लोपामुद्रा ज्ञानार्णवे। लोपामुद्रां पुनर्देवि विलिखेत्तदनंतरं। नंदि
केश्वरविद्यां च षट्कूटां वैश्रवीं भवेदिति। लोपामुद्राविद्यामग्रे वक्ष्यति। नंदिकेश्वरविद्या तु ज्ञा
नार्णवे। कामराजाख्यविद्यायां वाग्भवे मादनं त्यजेत्। चंद्रं तत्रैव संयोज्य कामराजे ततः परं। हि
त्वा चंद्रमुखे कुर्याद्द्वितीयं नंदिपूजिते इति। विद्येयं स्पष्टा भविष्यस्ये लोपामुद्राविद्याद्वारेण।
कामराजविद्या चाग्रे वक्ष्यते। स्मरोपि अनेनैव विधिना कामराजविद्यामुपास्य महा
मुनीनां मोहको जात इति भावः। इति पंचमपद्यार्थः। भवतु हरिर्नारीरूप्यमासाद्य
पुररिपोः क्षोभकरः मदनोपि रावणादिवत्करालदर्शनः सन्मुनीनां मोहकः कथं १०
न स्यादित्यत आह। धनुः पौष्पं मौर्वी मधुकरमयी पंचविशिखा वसंतः सामंतो मलय

मरुदायोधनरथः। तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपामपांगात्ते लब्ध्वा जगदिदमनंगो वि
जयते।६। पुष्पमयं धनुः सुकुमारतरं। नवज्रसारायमाणं। ज्या च षट्चरणचंचरीकमयी। विशिखा
श्च पंचैव नाधिकाः ते पि पौष्पाः। सामंतः सहायो वसंतः सोपि कदाचित्कः। सांग्रामिको रथो मलया
निलः मंदगमनः। स्वयमनंगः तथाप्येकः सर्वं जगदहे हिमगिरिसुते दयारससीतलैर्विजयते
करुं तवापांगात् कामपि कृपां विशिखवर्त्तिर्वक्रमशक्यां लब्ध्वा विजयते। एतावता रावणादिवत्क्रू
रदर्शनः अतिसौम्यदर्शनः आयुधादयोप्येतादृशाः तथापि जगद्विजयते। इति पूर्ववद्भाव्याः कृपा
कटाक्षमहिम्नेति भावः। नहि मां कीदृशीं ध्यात्वा स्तोषीत्यत आह॥ ॥क्वणत्कांचीदामा करिकल
भकुंभस्तननता परिक्षीणा मध्ये परिणतशरच्चंद्रवदना। धनुर्बाणान्पाशं सृणिमपि दधा
ना करतलैः पुरस्तादास्तां नः पुरमथितुराहो पुरुषिका॥७॥ क्वणत्कांचीदामयस्याः सा क्वण
त्कांचीदामा। उच्चावंतः करिशावककुंभस्तनन्नरा। करिशावो हस्तिपोतकः। यथास्तनवत्कुंभ कमि
नि। कुंभ नशाद्दे नैव करिशावकस्य प्राप्तत्वात्। अथवा। करिपुर्णकुंभकाशालिन्नतत इति केचन।
करिवर इति यावत्। तस्य कुंभो तावित्र स्तनन्नरो यस्याः सा। परिक्षीणा मध्ये क्षाममध्येति। राका

सौं·स·

शशांकानना। एवं धनुः पुष्पमयं बाणान् पाशं सुवर्णमयं। सुवर्णमयमंकुशं धारयंती। तदु
क्तं मनोरमायां। सौवर्णौ पाशांकुशौ वामदक्षिणयोर्ध्येयाविति। अथ स्तनकरयोर्वामदक्षिणक्र
मेण धनुर्बाणौ ध्येयौ। उपरितनवामदक्षिणक्रमेण पाशांकुशौ ध्येयौ। केषांचित्संप्रदायेश
कोनां दक्षिणे वामकरगतपाशांकुशौ ध्येयौ। अन्येषां वामदक्षिणक्रमेणेति। पुरस्तादास्तां नः
प्रत्यक्षा भवतु। प्रार्थने लोट्। पुरमथितुराहोपुरुषिका। आहोपुरुषशब्दाद्वुञ् कित्कृते तस्यैकदे
शे कृते शब्दोयं सिद्धः। दर्पातिशयसंभावना। आहोपुरुषिका दर्पाद्यास्या संभावनात्मनि। त्वम
रः। त्रिपुरं दिधक्षुः दर्पातिशयेनात्मनिष्ठेन प्रायमेन त्रिपुरमिति यां संभावनां कृतवान् सा भव
ध्वं कृतेन पुरस्तादास्तां। पुरारेर्या अकुंठिता शक्तिः सा त्वमेव। न शक्तः सर्वत्र प्रभवति। इति पूर्वो
क्तश्लोकार्थः स्मारितः। न इति बहुवचनं संतोषातिशयेनात्मनो गौरवख्यापनार्थं॥ ध्यानमु
क्तं कुत्र ध्येयाहमित्यत आह॥ ॥ सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपो
पवनवति चिंतामणिगृहे॥ शिवाकारे मंचे परमशिवपर्यंकनिलयां भजंति त्वां धन्याः कतिच ११
न चिदानंदलहरीं॥ ८॥ अमृताब्धिमध्ये कल्पवृक्षवाटिकावृते कदंबोपवनयुते नवरत्नख

चितद्वीपे चिंतामणिघटितकुड्यस्तंभप्राकारतोरणादिमंडितगृहे शिवाकारभाजि मंचे। सदा
शिव एव मंची भवतीत्यर्थः। तथा मंचचरणभूतविधिहरिरुद्रेश्वरविलसिते मंचे भूतसदाशि
वे परमात्मने परमशिवपर्यंकनिलयां। परमः शिवः गुणातीतः सकलप्रपंचसाक्षी सच्चिदा
नंदसुंदरः। तवेच्छया पर्यंकतां प्राप्त इत्यर्थः। तत्र निषण्णां त्वां धन्याः कतिपये पश्चिमजन्मानः
सच्चिदानंदलहरीं परमशिववनितां भजंति। तदुक्तं रुद्रयामले। यस्य नो पश्चिमं जन्म न
स्वयं यो महेश्वरः। स न प्राप्नोति परमां दशपंचाक्षरीमिमामिति। अनेन ध्यानयोगेन भज
तो जन्ममरणदुःखानुबंधोन्मूलनं भवतीति भावः॥ शिव एकारः। एकादशाक्षरः। तत्त्रिको
णं। परमशिवो बिंदुः तन्निलयां श्रीचक्रांतर्गतत्रिकोणमध्यबिंदुनिलयां। धन्या भजंतीति
सांप्रदायिकोर्थः। सद्गुरुगम्यः। ध्यानं त्रिविधं स्थूलं सूक्ष्मं परं चेति। क्वणत्कांचीदामामि
ति स्थूलं ध्यानमुक्तं। चिदानंदलहरीमिति परं ध्यानमुक्तं। इदानीं सूक्ष्मं ध्यानमाह॥ ॥
महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि।
मनोपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसे।

णी। षट्चक्राणि। मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाख्यानि। क्रमेण च्चादिपंच
महाभूतानां मनसश्च स्थानानि। एतच्च चक्रषट्कं कुलपथ इत्युच्यते। तदुपरि शिरसि सहस्रद
लं। अकुलपथ इत्युच्यते। हे कुंडलिनी स्वरूपे परमेश्वरि। महीं मूलाधारे जित्वा। चतुर्दलपद्म
महीस्थानं जित्वेत्यर्थः। स्वाधिष्ठाने कंजलं जित्वा षड्दलं जित्वा। मणिपूरे हुतवहं स्थितिं द
शदलं जित्वा। अत्र व्यत्ययेन योजना। स्वाधिष्ठानमणिपूरयोः शाक्तानां च मतानुसारेण
संज्ञाव्यत्ययो वा। हृदि मरुतं द्वादशदलं जित्वा। कंठे आकाशं षोडशदलं जित्वा। आज्ञायां
मनः द्विदलं। एतत्सर्वं कुलपथं जित्वा। सहस्रदले अकुलपथे रहसि पत्या परमशिवेन
सह विहरसे। एतावता एवं स्वरूपध्यानयोगेनोपास्यमाना नमित्यागादिसिद्धिं दिश
ति। सहस्रदलकमलेन संयुज्यमाना निर्वाणपदवीं दिशसीति भावः। तदुक्तं सिद्धिसोपा
ने। कुंडलिन्या महानंदे योगात्यजति मेदिनीं। सलिलस्थाननंदे न जले वहति योगवित्।
वह्निनंदे जलमिव स्पृशत्यग्निं ज्वलन्नपि स्वं। मरुन्नंदे शीघ्रगतिर्याति क्रोशशतं क्षणात्। व्योम २२
नंदे खेचरति मनोनंदे मनागतिः। यत्र कामयते तत्र याति लोकत्रयेऽपि च। संयोजयन् शिव

पदे शिव एव प्रजायते। कर्त्रीहर्त्री च सर्वत्र सुरासुरनमस्कृतेति। इति स्वरूपध्यानेन स्तुत्वा चितं कुं
डलिन्या भूमिकात्रयं। उत्पत्तिभूमिकान्वयभूमिका प्रसारभूमिकेति। अनेन पद्येनोक्ता। भ्योर
अपरेष्वाह॥ ॥सुधाधारासारैश्चरणयुगलांतर्विगलितैः प्रपंचं सिंचंती पुनरपि रसाम्ना
यमहसा॥ अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुं
डे कुहरिणि॥ १०॥ सुधाधारासारैः अमृतधारासंपातैः। चरणयुगलांतर्विगलितैः। भ्रूमध्य
गुरुचरणमध्यमार्गतो निस्यंदमानैः प्रपंचं मानसस्थानादिषट्कं रूपं कुलपथं सिंचंती।
एतेनान्वयभूमिकोक्ता। प्रसारवृत्तिभूमिकामाह। पुनरपि रसाम्नायात् षडाम्नायाः पूर्व
दक्षिणपश्चिमोत्तरोर्ध्वानुत्तराः। एते षडाम्नायाः स्थानानि। अनुत्तरादिक्रमेण
भ्रूमध्यादि मानसादिक्रमेण वा। एतेषां महसा प्रकाशकतेजसा। स्वां भूमिं मूलाधा
रमवाप्य भुजगनिभं अध्युष्टवलयं सार्धत्रिवलयमात्मानं कृत्वा कुंडे मूलाधारांतर्गत = कुलर
चतुर्दलपद्मकर्णिकामध्यवर्तिनि त्रिकोणे स्वपिषि। कुहरिणि कुहरं रंध्रं विशेषतः तत्
तद्दिष्टरूपसस्थान इत्यर्थः। एतेन पद्यद्वयेन कुंडलिनी रहस्यं सोपानमभिहितं। तदुक्तं

सौं॰ स॰

चतुःशस्यां। मूलादिब्रह्मरंध्रांतरकोणांतं तु संनिभ्नां। कुलकुंडलिनीं नित्यां विघ्नदध्मीसदृक्तनुं।
शमन्तालिकुलभ्रंगारसद्दृन्नतरनादिनीं। उन्नीयोन्नीय चक्रे प्रुक्रमात्स्थंदति वै न वं। अनुरूपपरं
गत्वापीत्वा कुलपरामृतं। अकुला कुलकं भूयः कुलादिकुलकं मुहुः। एवं मां सुंदरीं ध्यायेत्सर्व
ज्ञ ध्यानं प्रकीर्तितमिति। शिवाकारे मंचे इत्यादिना श्रीचक्रं सूचितं। इदानीं श्रीचक्रस्वरूपमा
नमाह।। ॥चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि प्रभिन्नाभिः शंभोर्नवभिरपि मू
लप्रकृतिभिः॥ चयश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयत्रिरेखाभिः सार्द्धं तव चरणकोणाः
परिणताः॥११॥ चतुर्भिः श्रीकंठैः शिवैः शिवयुवतिभिः शक्तिभिः शिवानामधः। ऊर्ध्वमुखत्रि
कोणाः शिवाः अधोमुखास्त्रिकोणाः शक्तयः। नाभिः प्रभिन्नाभिः शंभोर्नवभिः मूलप्रकृतिभिः
श्रीचक्रकारणभूताभिर्नवयोनिभिः चयश्चत्वारिंशत्कोणाः वसुदलकलाश्रत्रिवलयत्रिरेखा
भिः। अष्टदलषोडशदलवृत्तत्रयभूगृहत्रयैः सहतव चरणयोः कोणाः नवचरणकोणाः।
नवचरणकोणपरिणतयः एवेत्यर्थः॥ एतदुक्तं भवति श्रीचक्रांतर्गतबिंदुरूपस्य शंभोः ऊर्ध्वा १३
मूल १ धःस्थितनवयोनिभिः श्रीचक्रकारणभूताभिर्निष्पन्नत्रिकोणाष्टकोणदशारद्वयचतुर्द

शाराणां। एवं चित्वारिंशत्कोणाः। अष्टदलषोडशदलवृत्तत्रयचतुरस्रोपशोभितभूगृहत्रयैः
सार्द्धं तव चरणकोणाः परिणताः। तव चरणकोणपरिणतिरूपं श्रीचक्रं विलसितमिति भावः।
तदुक्तं संकेतपद्धत्यां। पंचशक्तिचतुर्वह्निसंयोगाच्चक्रसंभवः। चतुर्वह्निः चत्वारो रुद्रा इत्यर्थः
रुद्रो वा एष यदग्निरिति श्रुतेः। बिंदुत्रिकोणवसुकोणदशारयुग्ममन्वष्टनागदलसंमित
षोडशारं। वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेतदुदितं परदेवतायाः। इति मंत्रमुक्ताव
ल्यां। आथर्वणश्रुतिरपि सौभाग्यकांडे। तिस्रः पुरस्त्रिपथा विश्वचर्षणी यत्राकथा अक्षराः
संनिविष्टाः। यैताअजरा पुरा रणी महत्तरा महीनां देवता नां नवयोनिर्नवचक्राणि दीधिरे।
नवैव योगान् वपोगिन्य एव। नवानां चक्राणां। अधिनाथस्येतान् वमुद्रान वभद्रा महीनां।
एकाम्नासी लघमामान वासी। स्रोनविंशोनास्रोनविंशचत्वारिंशान वतिस्रः समिद्धाः संतोरि
वमातरो मा विशंत्विति। तस्या द्वारकमस्त्व। वृत्तं च त्वेष्टमानेन स्वच्छं वा परायतं। विन्य
स्य विभजेद्दृष्टि चत्वारिंशद्दृशातः। षष्ठे षष्ठे पंचमे च तृतीये च तृतीयके। चतुर्थे च तृती
ये च षष्ठे षष्ठांशके पुनः। विधायनव चिह्नानि ते पुष्पत्वाणि पातयेत्। नवयाम्योन्नराग्राणि

तेषामुभयपार्श्वतः। आद्यद्वितीयचतुर्थानां तथा पंचमषष्ठयोः। अष्टमांतिमयोर्विद्वानग्नि
बाणकलांशकान्। पुराणाब्धष्टवेदाग्निसंख्याशान् मार्जये क्रमात्। शनिमध्ये रवेरंतो चंद्रां
तो केतुमध्यतः। मंगलांतो ह्यत्रमध्ये बुधांतो राहुमध्यतः। गुरोरंतो नो ममध्ये शुक्रांतो सो
म्यमध्यतः। शन्यंतो वृत्तमध्ये तु राह्वंतो रविमध्यतः। केत्वंतो बुधमध्ये तु योजये क्रमतो बु
धः। मध्यवह्निस्फुरद्रूपमष्टद्विदशवह्निकं। चतुर्दशानलोपेतं श्रीचक्रं जायते परं। तद्वहि
र्वृत्तपत्राणां तद्बहिः षोडशाच्छदं। वृत्तत्रिवृत्तसंशोभं त्रिरेखांकितभूगृहं। त्रिधामनिलयं द्वा
रश्चतुष्टयसुशोभितं। सर्वतेजोमयं दिव्यं सोमसूर्यानलात्मकमिति। षोडशकलाः सप्त
विंशतिनक्षत्राणि। तेन त्रिचत्वारिंशत्कोणात्मना सोमरूपता। द्वादशकला द्वादशमा
सयः। वेदत्रयी। उदात्तादिस्वराः। तेन त्रिचत्वारिंशत्कोणात्मना सूर्यस्वरूपता मध्यत्रिकोण
साक्षात् कुंडरूपं बिंदुचक्रं तेजोविलासः। तेजोविलासात्। अष्टकोणात्मनाग्नेष्टौ मूर्तयः
। जातवेदाः सप्तजिह्वः। हव्यवाहनः। कौमारतेजाः। अश्वोदरजः। वैश्वानरः। विश्वमुखः। देवमु १५
खइति। दशकलाः दशविस्तृतयः। विराट्स्वराट्सम्राट्। अतिमूर्तिः। विष्णुः। परिव्रत। प्राची

त्र्यस्रइति। चांनाः। शिवाः। २। इति कलात्मनां तद्दशारं। दशविभूत्यात्मना बाह्यदशारं। सात्विक
राजसात्मकद्वितीयत्वात्मना चतुर्दशारमिति वह्निरूपता। तथा चश्रुतिः। प्राचीमनुप्रदिशं प्रे
हि विद्वानग्नेरग्ने पुरो अग्निर्भवेहि। विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतु
ष्पदे इति। अस्यार्थः। नो अग्ने प्राचीं दिशं अनुपश्चात् दिशं विदिशं प्रेहि। प्रकर्षेण इह प्रच्छ।
सर्वत्र दीप्यस्व विद्वान् यतस्त्वं रहस्य वेत्तासि तेन ताम् अग्निर्भवेह त्रिकोणस्य पुरः अग्निर्भव।
एतावता त्रिकोणचतुष्टयस्य धर्मानुरूपस्य षष्ठी अतं विश्वा आशा दीप्यानः आशा दिशः वि
श्वा विश्वसंख्याः प्राप्य दीप्यमानः। विभाहि विश्वं नु वनं तत् संख्या चतुर्दशः अन्नं नो धे
हि द्विपदे चतुष्पदे द्विपदे मनुष्ये चतुष्पदे गवादौ नोस्माकमन्नं तद्द्धेहि। एतच्चतु
र्दशारद्दशारद्व्याष्टकोणत्रिकोण [illegible] बिंदुभिः। स्फुरद्रूपं दिव्यं चक्रं अष्टदलषो
डशदलचतुरस्रत्रयगतद्वादशकोणैः षट्त्रिंशत्तत्वात्मकैर्वेष्टितं परदेवतायां नि
जमासनमिति सिद्धं। ऋतं सत्यं परं ब्रह्म। ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिं। अज
स्रं घर्ममीमहे इति। अस्यार्थः। ऋतावानं सत्यस्वरूपं। विश्वेच ते अनराश्च अमर्त्यास्तेषु ।

विश्वानराणां संबंधी वैश्वानरः सर्वदेवमुखमित्यर्थः। अग्निमुखा वै देवा इति श्रुतेः। अ
नस्य ज्योतिषस्पतिं। ऋतमग्निः। अग्निर्वा ऋतमिति श्रुतेः। उत्सेकवचनं। अग्निमीस्य पतिं। ३२
अजस्त्रं अवः। अवसंख्यानि अजस्त्राणि कोणयस्येति सोऽजस्त्रः चतुर्दशास्त्रं। बिंदुविस
र्गयोर्वा मध्ये गणनाभावात्। चतुर्दशाचः ईमहे जानीमहे शरणं व्रजाम इति वा। अथवा
विश्वसंबंधी वैश्वः। वैश्वश्वासावनलश्चेति कर्मधारयः। रत्नयोरभेदः। अजस्त्रं नवास्त्रं वा धर्म
त्वर्थात्मकं ईमहे इत्यन्वयः। इति श्रीचक्रोद्धारक्रमो गुरुमुखादवगंतव्य इति। श्रीच
क्रस्वरूपमुक्त्वा तदधिष्ठात्र्याः परदेवतायाः सौंदर्यादिगुणान् स्तोतुं उपक्रमि(?)ष्यति॥ ॥
त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तुलयितुं कवींद्राः कल्पंते कथमपि विरिंचिप्रभृतयः
॥ यदालोकौत्सुक्यादमरललना यांति मनसा तपोभिर्दुःप्रापामपि गिरिशसायुज्य
पदवीं॥१२॥ हे तुहिनगिरिकन्ये त्वदीयसौंदर्यं ब्रह्मादयः कवींद्राः वेदादिविद्याप्रव
र्तकाः। तव सौंदर्यं तुलयितुं उपमानोपमेयभावेन वर्णयितुं किं कल्प्यंते न कथमपीत्यर्थः।
उपमानाभावादिति भावः। यदालोकौत्सुक्यात्। अलौकिकविशेषात्। मनसा आलोक

ध्यात्वा अमरललना देवांगना अन्यैर्योगिभिर्दुःप्रापां गिरिशसायुज्यपदवीं यांति। अमरयोगा
द्विहाय ध्यानयोगेन शिवसायुज्यपदवीं प्राप्नुवंतीति भावः। अथवा। अमराणां न जनं विला
सोयेषां ते अप्रतिहतत्वे न वा। अमरोचितनानाभोगाननुभूयांते ते पुमांसः शिवसायुज्यं प्रा
प्नुवंतीति भावः। ननु केमशेषकुलनेत्र नायौ। यत्रास्ति भोगो न हि तत्र मोक्षो यत्रास्ति मोक्षो न
हि तत्र भोगः। शिवापदांभोजयुगार्चकानां भुक्तिश्च मुक्तिश्च करस्थितैवेति। यत्र ब्रह्मादयोऽपि
वर्णने कुंठितास्तत्राहं त्व[illegible] सौंदर्यवर्णने को वा वराकः। तथापि तवैव दयाकलितापांग
कणिकया तव सौंदर्यादिगुणवर्णने प्रवृत्तोस्मीति वदन्नेवापांगमहिमानं वर्णयति।
॥ ॥ नरं वर्षीयांसं नयनविरसं नर्मसु जडं तवापांगालोके पतितमनुधावंति शतशः
गलद्वेणीबंधाः कुचकलशविस्रस्तसिचया हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवत
यः॥१३॥ नरं वर्षीयांसं वृद्धं कुरूपं क्रीडासु जडं अनभिज्ञं तव दृक्पातरंगिणापांगवीक्ष
णेनानुगृहीतं। विगलितकबरीभराः कुचकलशविस्रस्तवसनाः। हठात्त्रुट्यत्कांच्यो
विगलितदुकूलाः अनुधावंति शतशः अहमहमिकया पश्चाद्धावंति। लज्जापरित्यागेन

१५

तदेकचित्तास्तन्मादग्रव्यव्यभिचारिभावपरवशाभ्राम्यंतिगतावतांतवापांगमहिमा
एनादृशाःद्धसौंदर्यगुणार्णवान्समर्थोविजेतुमितिभावः॥ अपांगमहिमानमभिधायच
रणमहिमानमाह॥ ॥क्षितौषट्पंचाशद्द्विसमधिकपंचाशदुदके हुताशेद्वाषष्टिश्च
तुरधिकपंचाशदनिले॥दिविद्विःषट्त्रिंशन्मनसिचचतुःषष्टिरितियेमयूखास्तेषाम
प्युपरितवपादांबुजयुगं॥१४॥ अत्रैवंव्यवस्थाअत्रपूर्वत्रमुत्तरतंत्रमितिद्विविधंत
त्रंपूर्वतंत्रंशाक्तिपुरःसरंउत्तरतंत्रंशिवपुरःसरंशाक्तिपुरःसरंशाक्तंशिवपुरःसरंशां
भवमुच्यते।शांभवेशिवशक्त्योस्तेजोभिरेवोत्पन्नाआवरणदेवताःरश्मयइत्युच्यं
ते।शांभवंषडन्वयात्मकंतंत्रं।षडन्वयास्तु।मानसनाभसवायव्यतैजसआप्य
पार्थिवाः।एतेषामुत्पत्तिक्रमउच्यते।निर्गुणस्यसकलप्रपंचसाक्षिणःसच्चिदा
नंदरूपस्यशिवस्यविश्वोत्पादनलीलासमुज्जृंभितस्फुरणविशेषाद्धि।तवेशशा
क्तेःसकाशात्परानामशक्तिरुत्पद्यते।साचप्रपंचोन्मीलननिमीलनलीलानुग्रा   १६
हकमनोधिष्ठात्रीसती।ब्रह्मरंध्रादेर्न्मध्यांतर्व्यापिनीमुपाधिसरणिंसमासाद्य

मज्ञाधिदैवतेतिनिगद्यतेतथाचेछा।ज्ञानाक्रियाकुंडलिनीमातृकेतिदेवताउत्पन्नान
भोवायुतेजोजलभूमिस्थानेषु।कंठहृदयनाभिलिंगगुदोर्ध्वभागेषुविशुद्ध्यनाहतस्वा
धिष्ठानमणिपूरकमूलाधारसंज्ञेषुविलसंति।तास्त्वनुगस्त्वंशसमेदोमज्ञाख्यिदेव
ताःतयाचेताभिर्दैवताभिःसचराचरंविश्वंसमुज्जृंभते।तन्मध्येकुंडलिनीमातृका
भ्यांषडन्वयंतंत्रमेतच्छांभवमुत्पन्नं।सर्गादौपश्चात्सकलप्रपंचउत्पन्नः।तदुक्तंकुब्जि
कातंत्रे।शिवस्यनिःप्रपंचस्यपरमस्याशरीरिणः।चिदुल्लासात्पराजातापंचानांमातृरू
पिणी।अन्वयानांमार्गयोगात्सैकाषोढाप्रजायते।पराचेष्टातथाज्ञानाक्रियाकुंडलि
नीतिच।मातृकाचाष्टधाप्रोक्तापराभेदास्ततःस्मृताः।कुंडलीमातृकाभ्यांचषोढाभिन्न
मयूखकं।नानाविधंसुविततंतंत्रमेतत्षडन्वयं।उत्पन्नंशांभवंपश्चाज्जगदेतच्चराचरमि
ति।तथावरकृतिः।इयमेवसायाप्रथमाव्योक्षत्।सारूप्याणिकुरुतेपंचदेवीदेवस्य
रोवयतस्तंत्रमेतत्।सनातनंविततंतंत्रंष एमयूखमिति।अस्यार्थः।सात्रसिद्धाइय
मेवयाप्रथमाजगदादिःव्योक्षतप्रकटीभवत्परेतियावत्।सारूप्याणिकुरुतेपंचद

वी।दीव्यतीति देवी स्वलीलया इच्छाज्ञानक्रियाकुंडलिनीमातृकेति पंचरूपाणि कुरुते
तत्र देवस्वसारे कुंडलिनीमातृके एतच्छां नवं तंत्रं षोढा विस्तार्यमाणम् पूर्वं सनातनं अना
दिसिद्धं परंपरयानुवर्त्तमानं च। वयं ततः विस्तारयतः पृथिव्यादिस्थानेषु षड्विंशदादि
भेदेन मयूरवज्जालं विस्तारयतश्च स्पर्शः।द्वितो पार्थिवतत्वरूपाः अष्टाविंशतिरश्म
यः।पार्थिवतत्वानि तु पंचतन्मात्राः पंचभूतानि पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि
अंतःकरणचतुष्टयं कालः प्रकृतिः पुरुषः महत्तत्वानीति। अष्टाविंशतिः शिवशक्तिसं
बंधविधाभेदेन द्विविधानि तेन षट्पंचाशत्।५६। एतेषां नामानि अग्रे एव वक्ष्यंते। आप्यत
त्वानि षड्विंशतिः पंचभूतानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि दश तेषामर्थाः दश मनइ
ति सेवराक्रमभेदेन द्विशत्।५२। तैजसतत्वानि एकविंशतिः पंचभूतानि पंचतन्मात्राः

ज्ञानेंद्रियकर्मेंद्रियाणि साथ्योनि मन इति एकविंशति।४२।शिवशक्त्यो विभागेन द्वाष
ष्टिः।६२। वायव्यतत्वानि सप्तविंशतिः पंचतन्मात्राः पंचभूतानि पंचज्ञानेंद्रियाणि पं
चकर्मेंद्रियाणि अंतःकरणचतुष्टयं कालः प्रकृतिः पुरुषश्चेति मिलित्वा सप्तविंशतिः।

वायव्यतत्वानीत्यर्थः।महत्तत्वन्भून पार्थिवतत्वानि शिवशक्तिविभागेन चतुःपंचाशत्।५४।
दिविद्धिः षड्विंशत् शिवः शक्तिः सदाशिवः ईश्वरः शुद्धविद्या माया कला रागः कालः नियतिः
पुरुषः प्रकृतिः अहंकारः बुद्धिः मनः ज्ञानेंद्रियाणि कर्मेंद्रियाणि शब्दस्पर्शरसरूपगंधाः
पंचपंचभूतानीति शिवशक्तिविभागतः द्विसप्ततिः।७२। मानसतत्वानि द्वाविंशत्। तत्राद्यं
परा च त्रिविधा परा पश्यंती मध्यमा वैखरीति इच्छा पंचविधा कर्तुकारयितुमुपकर्तुं प्रतिक
र्तुमुदासितुमिति। ज्ञानाचतुर्विधाः तत्र ज्ञानं द्विविधं सालंबं निरालंबं च सालंबं त्रि
विधं ज्ञातृज्ञेयज्ञप्तिरूपेण। निरालंबं च त्वमहं त्वदीयं मदीयमिति चतुर्विधं। योगिनी हृ
दये। क्रियासप्तविधा। इष्टं दत्तं स्वाध्यायः जपः पूजा तपः दानमिति। कुंडलिनी चतुर्वि
धा क्रमिकाभेदेन। उन्मयः लयः प्रसारतिः विश्रांतिरिति। मातृका षष्टधा वर्गाष्टकभेदेन
एवं द्वात्रिंशत्तत्वानि।३२। शिवशक्तिविभागतश्चतुःषष्टिः।६४। एवं पार्थिवादितत्वरूपाः
षष्ठ्युत्तरत्रिशतं मरीचयः शांभवाः। तथा च कुब्जिकातंत्रे। आदौ परा चतुर्धा द्वितीयेच्छा च

पंचधा५इतीयांवेदधा४ज्ञानांत्वत्रया३सप्तधाक्रिया७पंचमीकुंडलिनीद्विद्विः४षष्ठी
स्यान्मातृकाष्टधा८परातोजायतेछाहिसाचव्योममतिःस्मृता।षड्विंशन्नामिकाप्रोक्ताकं
ठस्थानसमाश्रिता।इछातोजायतेज्ञानासाचवायोरधीश्वरी।सप्तविंशतिरश्मीनांपतिःसा
नाहतान्भपा।ज्ञानांतोचक्रियाव्यक्तासाचवह्नीश्वरीमता।एकत्रिंशद्रश्मिपतिःस्वाधिष्ठा
नेसमाश्रिता।क्रियातःकुंडलिनीव्यक्तासास्याज्जलिलनायिका।सप्तविंशतिरश्मीनांमणि
पूरंसमाश्रिता।कुंडल्यामातृकाजातासाक्षितेरीश्वरीमता।अष्टाविंशतिरश्मीनामधिपा
धारमाश्रिता।शिवशक्तिविनागेनद्विविधाशांन्नवाज्ञया।षष्ठ्युत्तरंत्रिशतमेवंशंतुमरीच
यःपरादिशक्तिभिःषड्भिर्नायकैःसहिताःपुनः।द्विसप्तस्वधिकत्रीणिशतान्याहुर्मनीषि
णः।एषांस्मरणमात्रेणजीवन्मुक्तोमहीवरेत्।सर्वेषांस्मरणाशक्तःषष्ठ्युचैकमपिस्म
रेत्।एतेषांस्मरतितोलोकःपापहाप्रजनात्सुनः।स्नात्वावाध्याननतोजीवन्मुक्तोरश्मि
कुलेवसे दिति।मूलाधारमध्येत्वयेवद्वन्मार्गेणशिवप्रत्ययोरणतयोश्चमरीचयः॥२३॥

श्वरः१३डीश्वरी२जालेश्वरः३री४कामेश्वरः५री६पूर्णेश्वरः७री८श्रीकंठः९गगनाः१०अनं
तः११स्मरमा१२शंकरः१३मतिः१४पिंगलः१५पातालदेवी१६सदाख्यः१७नादा१८आनंदः१९
डाकिनी२०आलस्यानंदन्नाथः२१शाकिनी२२महानंदः२३लाकिनी२४योग्यः२५काकिनी२६
अतीतः२७गाकिनी२८यादः२९हाकिनी३०आधारेशः३१रक्ता३२चक्रीशः३३चंडा३४कुरं
गीशः३५कराला३६मदश्रीशः३७मदोत्कुष्मा३८अनादिविमलः३९मातंगी४०सर्वज्ञविम
लः४१पुलिंदा४२योगविमलः४३शबरी४४सिद्धविमलः४५वाच्चापरा४६समयविमलः
४७कुलालिका४८मित्रेयः४९कुब्जा५०उड्डीशः५१लक्ष्मी५२षष्ठीशः५३कुलेश्वरी५४कूर्मा
धीशः५५कुब्जा५६सर्वत्रशिवानंदनाथश्रीपादुकांपूजयामीतियोजनीयमिति।शक्तौ
श्रीबादेवीतियोजयेत्।एतेपार्थिवरश्मयोमूलाधारेचतुर्दलेपश्चिमादिप्रतिदलंस
प्तकंपूजयेद्भावयेद्वा।अथवाशिरसिषट्कोणंविचिंत्यपश्चिमादितःरश्मीनांचतुष्कं।
पंचकंषट्कंचतुष्कंपंचकंपुनश्चतुष्कमितिप्रजप्य।तदुक्तंपद्मवाहिन्यां।त्रिकोणंशिरसि
ध्यात्वापश्चिमादिचतुष्क्रमान्।कोणेषुपूजयेदष्टाविंशकंपश्चिमक्रमात्।चतुष्कंपंच

कंषट्कं चतुष्कं पंचकं पुनः। चतुष्कमिति संभिन्नाः क्रमात् पार्थिवरश्मयइति। क्रमोच्चारापिवि
लिखपूजयेदिति पार्थिवरश्मयः। एतेनद्वितीषट्कं चारादिति व्याख्यातं। अथाप्याररश्मयः।
मणिपूरे अन्वशांनवेस्ताधिष्ठानमणिपूरकयोर्वलयः। रश्मयस्तु। सद्योजातः१ मायार
वामदेवः३ श्रीः४ अघोरः५ पद्मा६ तत्पुरुषः७ अंबिका८ अनंतः९ निवृत्तिः१० अनाथः११ प्रतिष्ठा
१२ अनाश्रितः१३ विद्या१४ अविंस्रा१५ शांता१६ विश्वेश्वरः१७ उमा१८ तीव्रः१९ गंगा२० मणिवा
हः२१ सरस्वती२२ अंबुवाहः२३ कमला२४ तेजोधीशः२५ पार्वती२६ विद्यावागीश्वरः२७ चित्रा
२८ चतुर्विश्वेश्वरः२९ कमला३० उमागंगेश्वरः३१ मन्मथा३२ ऊर्ध्वेश्वरः३३ श्रिया३४ श्रीकं
ठः३५ जया३६ अनंतः३७ सती३८ शंकररत्नः३९ मेखला४० पिंगलः४१ यशोवती४२ साध्याख्यः
४३ हंसानंदा४४ परादिव्यौघः४५ वामा४६ मारदिव्यौघः४७ ज्येष्ठा४८ पाठेश्वरः४९ रुद्रा५० स
र्वेश्वरः५१ सर्वमयी५२। एते आप्याररश्मयो मणिपूरे षड्दलेषु ज्याः। चतुष्कं चतुष्कं षट्कं च ॥१९॥
तुष्कं पंचकं त्रिकमिति तदुक्तं पद्यवाहिन्यां। चतुष्कं च चतुष्कं च षट्कं च षट्चतुष्ककं। पंच
कं त्रिकमिति पूर्ववद्विरसिवान्क्रमो पूजयेत्। इत्याप्यमरीचिप्रपंचः। एतेन द्विसमाधि

कपंचारादुदकेइति व्याख्यातं। अथतैजसाररश्मयः। परापरा१ चंडेश्वरी२ परमः३ चक्षुष्मती
४ तत्परा५ गुह्यकाली६ अपरः७ संवर्त्ता८ चिदानंदः९ नीलकुब्जा१० अघोरः११ गंधा१२ सामर
सः१३ रसा१४ ललितः१५ स्मयारूपा१६ छंदः१७ स्पर्शा१८ भूतेश्वरः१९ शब्दा२० आनंदः२१ डाकि
नी२२ आलस्यः२३ लडाकिनी२४ प्रज्ञानंदः२५ वक्रडाकिनी२६ पारपानंदः२७ पद्मडाकिनी२८
अनीतः२९ कुब्जडाकिनी३० स्वादः३१ प्रचंडडाकिनी३२ योगेश्वरः३३ चंडा३४ पीठेश्वरः३५ कोश
ना३६ कुलकोलेश्वरः३७ पावनी३८ ऊर्ध्वेश्वरः३९ समया४० श्रीकंठः४१ कामा४२ अनंतः४३ रेव
ती४४ शंकरः४५ ज्वाला४६ पिंगलः४७ कराला४८ सादाख्यः४९ कुब्जिका५० कालरात्रिः
५१ गुरुपरापर५२ सिद्धगुरुः५३ शांत्यतीता५४ रत्नगुरुः५५ शांता५६ शिवगुरुः५७ विद्या५८ मेल
गुरुः५९ प्रतिष्ठा६० समयगुरुः६१ निवृत्तिः६२ एतेस्वाधिष्ठाने दशदले पश्चिमादिनवद
ले पुनस्त्रिकत्रिकक्रमेण पूजयित्वा दशदले चतुष्ककं पूजयेत्। षट्कोणपूजायां पंचकं पं
चकं षट्कं चतुष्कं पंचकं षट्कमिति पूजयेत्। तदुक्तं पद्यवाहिन्यां। चतुर्षाद्विके। पंचकं पं
चकं षट्कं चतुष्कं पंचकं पुनः। षट्कमितिक्रमाद्भिन्नास्तैजसाः क्रमरश्मयइति। एतेनद्वा

शेद्वाषष्ठिरितिव्याख्यातं। अथवायव्यमरीचयः। खगेश्वरः१ नन्दारः२ कूर्मः३ आधारः४ शेषः५
शोकाः६ मीनः७ मालिका८ ज्ञानः९ विमला१० महानन्दः११ शर्वरी१२ नादः१३ लीला१४ प्रियः१५ उ
मुद्रा१६ कालिकः१७ मेचका१८ डामरः१९ डाकिनी२० रामः२१ शाकिनी२२ लामः२३ लाकिनी२४ का
मरः२५ काकिनी२६ सामयः२७ शाकिनी२८ हामरः२९ हाकिनी३० आधारेशः३१ शाका३२ चक्री
शः३३ बिन्दुः३४ कुः३५ ऊला३६ मदर्शी शः३७ कुब्जिका३८ दीशः३९ कामकला४० सिरे
शः४१ कुलदीपिका४२ शिखेशः४३ शर्वरी४४ व्योमेशः४५ वज्ररूपा४६ दशस्वेशः४७ महत्तरी
४८ परमगुरुः४९ मंगला५० परमाधिगुरुः५१ कोमला५२ इज्यगुरुः५३ समा५४। एतेनाहृ
तेद्वादशेदलेपश्चिमादिरुत्याः। इतीयषष्ठेन दलेषु त्रिकं त्रिकमिति। अन्येषुद्वयं द्वयं।
अथवा [illegible] प्रथमांतिमयो त्रिकं चतुष्कं अन्येषु द्वयं द्वयमिति। षट्कोणपूजायां च
तुष्कं पंचकं षट्कं चतुष्कं पंचकं त्रिकमिति पूजयेदिति न्यमो वा। तदुक्तं पद्यवाहिन्यां।
द्वितीयाह्निके। चतुष्कं पंचकं षट्कं चतुष्कं पंचकं त्रिकं। इति क्रमेण नित्यास्तु पूर्वादि वा पा २०
मराश्वय इति। एतेन चतुराधिकपंचाशदनिलेइति व्याख्यातं॥ अथनोन्नसाः। हृदयः१ को
षिनी२ धरः३ शांता४ नोगः५ विश्वेशी६ नयः७ योगिनी८ महः९ ब्रह्मसारा१० शवः११ शवरी१२ दः१३
कालिका१४ रसः१५ पुष्टविजा१६ मोहः१७ अघोरेशी१८ मनोनवः१९ हेला२० सेकः२१ महरदा२२ ज्ञा
नमुखः२३ कुब्जिका२४ खरः२५ डाकिनी२६ ज्वलनः२७ शाकिनी२८ महाकूटः२९ लाकिनी३० त्रियोन
३५ लः३१ काकिनी३२ तेजाः३३ शाकिनी३४ मरुत्३५ हाकिनी३६ वायुः३७ पापघ्नी३८ कुलः३९ सिंहा४० संहारः
४१ कुलाधिका४२ विश्वंभरः४३ क्रमा४४ कौलिः४५ कूर्ममाता४६ गालवः४७ कंकाली४८ व्योमः४९
व्योमा५० श्वसनः५१ नादा५२ खेचरः५३ महादेवी५४ वज्रलः५५ महत्तरी५६ ततः५७ कुंडलिनी
५८ कुलातीतः५९ कुलेशी६० अजः६१ इंधिका६२ मतः६३ दीपिका६४ ईशः६५ रेचिका६६ दशरथः६७
मोचिका६८ परमः६९ परा७० परः७१ चित्७२ एते विश्वेशी षोडशदले पूज्याः आद्यन्तदलयोस्त्रि
कं त्रिकं। अन्येषु दलेषु द्वयं द्वयमिति। षट्कोणपद्मे तु प्रतिकोणे षषट्कं षट्कमिति पूजयेत्। न्य
मो वा। तदुक्तं पद्यवाहिन्यां। द्वितीयाह्निके। षट्कं षट्कं पुनः षट्कं षट्कं षट्कं पुनस्ततः। इति क्रमा
समुद्दिष्टा नान्नसाश्चात्र रसमयः। एतेन द्विविंशः षट्त्रिंशदिति व्याख्यातं। अथमानसाः रश्मि
यः। परा१ अपरा२ नदः३ जरा पराः४ चित्५ चित्परा६ महामाया७ महामायापरा८ इच्छा९

ष्टापरा १० सृष्टिः ११ सृष्टिपरा १२ स्थितिः १३ स्थितिपरा १४ निरोधः १५ निरोधपरा १६ मुक्तिः १७ मुक्ति
परा १८ ज्ञानः १९ ज्ञानपरा २० सत्यः २१ सत्यपरा २२ असत्यः २३ असत्यपरा २४ सदसत् २५ सदसतीपरा २६
क्रियः २७ क्रियापरा २८ आत्मा ३० आत्मपरा ३१ इंद्रियाश्रयः ३२ इंद्रियपरा ३३ गोचरः ३४ गो
चरपरा ३५ लोकमुख्यः ३६ लोकपरा ३७ वेदवत् ३८ वेदवतीपरा ३९ संवित् ४० संवित्परा ४१ कुंडलि
नी ४२ ॐ कुंडलिनीपरा ४३ सौषुम्नः ४४ सौषुम्नपरा ४५ प्राणसूत्रः ४६ प्राणसूत्रपरा ४७ स्पंदः
४८ स्पंदपरा ४९ मातृकः ५० मातृकापरा ५१ स्वरोद्भवः ५२ स्वरोद्भवपरा ५३ वर्णजः ५४ वर्णजाप
रा ५५ शब्दजः ५६ शब्दजापरा ५७ वर्णज्ञानः ५८ वर्णज्ञानपरा ५९ वर्गजः ६० वर्गजज्ञानपरा ६१
संयोगः ६२ संयोगपरा ६३ मंत्रविग्रहः ६४ मंत्रविग्रहपरा ६५ इति मानसारस्मयः। आज्ञायां द्वि
दलेष्वप्याः। चतुष्कचतुष्टयं षष्ठदले चतुष्कचतुष्टयं द्विदलेषु द्रोणपद्मे। चतुष्कपं
चकं चतुष्कं सप्तकं चतुष्काष्टकमिति। तदुक्तं पद्मवाहिन्यां प्रथमाद्विके। चतुष्कं पंचकं चैव च
तुष्कं सप्तकं पुनः। चतुष्कमष्टकमिति क्रमान्मानसरश्मयः इति। मूलाधारादिषट्‌चक्रेषु च
तुष्कादिकं पूर्वं जपेद्वा। प्रकारांतरमप्यस्ति। षड्जास्थानां नरमपि यथायोग्यं यथा देवता वद

ह्व

ेत्। इति मानसरश्मिप्रपंचः। एतेन मनसि चतुःषष्टिरिति ये मयूखाः इत्येतद्व्याख्यातं। ते
षामप्युपरि वपादांबुजयुगं। सर्वरश्मीनां मूर्द्धन्यं। सर्वप्रकाशकमिति यावत्। सर्वतत्वतेजो
मयत्वात्। तदुक्तं मानसोल्लासे। सर्वतत्वात्मतेजोभिरिंद्वं तव पदांबुजं। ध्यायन् शिवपदारोह
साक्षात्तेजोमयो भवेदिति। अथ तच्छिरसि तव निर्वाणचरणद्वयं सर्वोत्कृष्टनिरतिशयानंदरूपं
सर्वेषामप्युखानामुपरि भोगार्हं। साक्षाच्छिवपदे तस्यैव प्रसादेन सर्वतो विशेषाः प्रकाशंतइ
ति भावः। एवं चरणमहिमानमभिधाय वक्ष्यमाणया विधायावाग्भवकामराजशक्ति
जकूटत्रयात्मिकायाः प्रथमकूटस्य सात्विकं ध्यानमहिमानमाह॥ ॥शरज्ज्योत्स्नाशु
द्धां शशियुतजटाजूटमुकुटां वरत्रासत्राणस्फटिकगुटिकापुस्तककरां॥ कथं नु त्वां नत्वा
सकृदपि सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः॥१५॥ शर इंदि
कावच्छुक्ला। निजजटाजूटघटितमुकुटां वरानयस्फटिकाक्षमालापुस्तकधरां।
एतादृशीं त्वां मधुक्षीरद्राक्षामाधुर्यमधुरंधराः स्रक्रूपाः सतां वेदेकमत्वानां रसनां कथ
मपि संनिदधते सन्निहिता भवंति। जिह्वा इति शेषः। अपिशब्दो न हेतुविशेषो। वाद्भजनमंत

त्र

सौं॰स॰

~~सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभिर्वशिन्याद्याभिस्त्वां सह जननि संचिन्तयति यः । स~~
~~कर्ता काव्यानां भवति महतां भङ्गिसुभगैर्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥~~ ॥
रेणकारणान्तरं नास्तीत्यर्थः ॥ एवमस्याएवराज्ञस ध्यानमाह ॥ ॥कवीन्द्राणां चेतःकम
लवनबालातपरुचिं भजन्ते ये सन्तः कतिचिदरुणामेव भवतीं ॥ विरिंचिप्रेयस्यास्तरलतरशृंगा
रलहरीगभीराभिर्वाग्भिर्विदधति सतां रंजनममी ॥१६॥ बालातपरुचिमिति ज्ञातं ॥ कवी
न्द्राणां चेतःकमलवनानां विकाशायेति हेत्वलंकारः । ये सन्तः अरुणामेव अन्ययोगव्यवच्छे
दकोऽत्रैवकारः । भजन्ते ये ते विरिंचिप्रेयस्याः सरस्वत्याः तरलतरा उत्तरोत्तरमहमहमिका
याविजृंभमाणाः शृंगाररसप्रधानाः लहर्यः परंपरास्तद्वद्गभीराभिर्गूढविधशृंगाररसस
मवहितविभावानुभावसात्विकव्यभिचारिभावपुष्टाभिर्वाग्भिः सतां सहृदयतया श्ला
घनीयपरगुणानां रंजनं विदधति । एतादृश्यास्तवोपासनेन साक्षात्सरस्वतीमुखादा
विर्भूतगद्यपद्यादयः शृंगाररसप्रधानाः प्रस्फुरंतीति भावः ॥ मध्यकूटध्यानमहिमान
माह ॥ ॥तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिर्दिवं सर्वामुर्वीमरुणिमनिमग्नां स्म
रति यः ॥ भवंत्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः कति कति न गीर्वाण २२
गणिकाः ॥१७॥ तनुकांतिभिस्तरबालार्करुचिभिः सर्वां द्यां भुवं च मग्नां स्मरतस्तं त्वां

यो ध्यायति । तस्य त्रस्यद्वनहरिणशालीननयनाः त्रास्य हरिणानां मनुष्यादिदर्शने त्रासो
भवति । अत एतदुक्तं वनहरिणनयनसादृश्यं । एतादृश्यास्सहिताः सुरांगनाः कतिकति न वश्या न
भवंति तासां कारणमेनेति भावः । कतिकतीति काकुरत्र वितर्कालंकारद्योतनी । अनिमिषदृष्टीनां सुरांग
नानां नयनचांचल्यं दृष्टं तेन त तासां कामरूपित्वाभिप्रायेण । एतस्यैव कामकलारूपध्या
नमहिमानमाह ॥ ॥मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो हकारार्धं ध्यायेद्धरमहिषि ते म
न्मथकलां ॥ स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तन
युगां ॥१८॥ मुखं बिन्दुरूपेण ध्यात्वा कुचयुगलमधस्तस्य मुखरूपेण ध्यानस्य बिंदोरधः कुच
युगं ध्यात्वा तदधः हकारार्धं ध्यायेद्धरमहिषि चिंतयेत्कामकलां स सद्यः संक्षोभं नयति वनितामित्यति ल
घु रवीन्दुस्तनयुगां त्रिलोकीमपि आशु भ्रमयति । मितां हरस्वरूपे हस्त्रिलोकापि कामकला
रूपेति भावः ॥ तदुक्तं डयामले नो महाबिंदुमुखं चंद्रसूर्यौ स्तनद्वयौ । सुमेरुर्हार्धकलया
शोभमानां महोपदां । पातालनितम्बविन्यास्ता त्रिलोकी यंतदा विके । कामराजकलारूपा जगत्त्रि
सचराचरं ति । वक्त्रः शास्त्रामपि । यदक्षरराशिज्योत्स्नामंडितं भुवनत्रयं । वंदे सर्वेश्वरी देवी महा
श्रीसिद्धिमातृकामिति । अथवा कामस्य कामराजस्य कलाशोना । अथवा कामबीजस्य कला

नदेव बीजं ककारलकाररहितं कामकलाह्वयं। अतिगुह्यं महासरस्वतीबीजं। तदुक्तं माचार्यल
तौ। यन्नित्येन वकामराजमपरं मंत्राक्षरं तिःकुलं तत्सारस्वतमित्यवेति विरलाः केचिद्बुधास्तेद् २२
वि। आख्यानं प्रतिपर्वसत्यतपसो यत्कीर्तयंतो द्विजाः प्रारंभे प्रणवास्पदं प्रणयिनीं नित्यात्त्व
रंति स्फुटामिति। तथा च श्रुतिः। यई स्वरेण सलकं स्वरेण तिनिहि भवेद्दस्तु च्छतस्य कृपामिति।
सा पुनरलक्ष्यस्वरूपा। उरीपास्वरूपं च बिंदुत्रयात्मकं तत्रैको बिंदुः रविः परौ द्वौ दहनशीता
शू रविरूपबिंदुर्मुखवत्तानस्याधः दहनशीतांशुरूपं बिंदुद्वयं स्तनयुगं च त्तानदधः ह
कारार्द्धं योनिरूपं ध्यायेत्। हकारश्चैव नागेन्द्रश्चेसति अधो नागो योन्याकारो हरपतेनं ध्या
येदिति प्रकटोर्थः। तदुक्तं कादिमते। विद्याकूटत्रयं देवि तुरीयस्वरसे परम्। तत्तुरीयस्वरू
पं त्रिबिंदुत्रयमुदीरितं तदात्मकत्वं देव्यास्त्वे साधकस्य चयद्भवेत्। तद्भावनां शृणु प्राज्ञे म
होदयकारिणीं। ऊर्ध्वं बिंद्वात्मकं वक्त्रमधो बिंदुद्वयात्मकं। ऊचद्वयं तु तद्विद्याद्धेयोगा
नि विभावयेत्। इयमेकः प्रकारः। अथवा। हकारः शिवः तस्याई शिवेतिपदं शकारेका
रवकाराकाररूपं वर्णं च ऊष्मयात्मकं। तत्र अ ई शकारवकारात्मके गते। अई मिकाराका २३
रात्मकमवशिष्टं भवति। आनिलोम्येन तयोः संधौ सति एकारो योनिरूपो भवति। तं एका

रं ऊर्ध्वं तस्याधो योनिरूपं भावयेत्। अथवा हकारो रविः तत्र रविपदे रेफवकाररूपे ईं गते अका
रककारात्मकमर्द्धमवशिष्टं भवति। तयोर्विपरीतयोः संधौ एकारो योनिरूपो भवति। तं कुच
स्याधो भावयेदिति। अथवा तत्कारो हंसः। तत्रार्द्धे हकारसकाररूपे ईं गते अं अः इत्य ईं बिंदु
विसर्गरूपं बिंदुत्रयमवशिष्टं भवति। न चैवं योजना हे हरमहिषि। हकारार्द्धं अं अः इति बिं
दुस्वरात्मकं हंसार्द्धं ध्यायेत्। केन प्रकारेण मुखबिंदुं कृत्वा तस्याधो बिंदुद्वयं कुचद्वयं कृ
त्वा तदधः सन मन्मथकलामेकाकारां ध्यायेदिति। अतएव एतत्प्रकारत्रयेण कामकाम
लाह्वारात्रिप्रायेणाय विद्योद्धारे त्रिविधं हकारं संकेतं करिष्यति। शिवः रविः हंस इति। ए
ते हकारार्द्धं पर्यायाः प्रकटाः। वस्तुतस्तु हकारार्द्धं योगिगम्यः। सद्गुरुमुखादवगम्यः। तत्प्रका
रानेमहदनिष्टमिति न प्रकाशितं। तथा च संकेतपद्धतौ। एतत्कामकलाध्यानं गुह्याद्गु
ह्यतरं महत्। नाशिष्याय प्रवक्तव्यं नानास्तिकाय कदाचन। एतत्प्रकाशने मातः रुद्वादनमु
रोजयोः। आरुष्याच्छादनमिव तस्मान्नैव प्रकाशयेत्। लोभान्मोहाद्भयाद्वापि दैवेष्याद्वा प्र
काशयेत्। स चिरान्मृत्युमाप्नोति शस्त्रपातविषादिभिरिति॥ तृतीयकूटध्यानमाह॥

॥ ॥किरंतीमंगेभ्यः किरणनिकुरंबामृतरसं हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः॥
स सर्पाणां दर्पं शमयति शकुंताधिप इव ज्वरप्लुष्टान्दृष्ट्या सुखयति सुधासारसिरया॥२०॥
अंगेभ्यः किरणसमूहामृतरसं किरंतीं निस्यंदयंतीं त्वां चंद्रकांतसदृशशैत्यविशिष्टां हृदि ध्या
यन्नेव करोति स सर्पाणां दर्पं गरुड इव शमयति। तं सर्पावलोकनदशादिशायांति न यांति
ति भावः। ज्वरसंतप्तान्सुखयति सुधासारसिरया अमृतधारासंपातप्रणालिकया
दृष्ट्या सुखयति। सर्पदष्टानपि तथाविधदृष्ट्या सुखयति। गरुडदर्शनादिव सर्पदष्टा त
निर्विषा भवंतीति भावः॥ कामकलायाः स्वरूपानुसंधानमभिधायस्तस्य ध्यानमाह॥ ॥
तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं निषण्णां षण्णामप्युपरि कमलानां तव कलां
॥महापद्मा[illegible]टव्यां मृदितमलमायेन मनसा महांतः पश्यंतो दधति परमाह्लादलह
रीं॥२१॥ विद्युल्लताकांतितनुं सूर्येंदुवह्निरूपबिंदुत्रयमयीं षण्णामप्युपरि कमलानां २८
मूलाधारादीनामुपरिस्थितां तव कामकलां महापद्मवने निर्मृष्टमलमायेन। मला
नि त्रीणि मानसिकानि[illegible]कर्तृत्वाध्यवसायः क्रियानिष्पत्तिरिति तद्विषयिणी मायान
सं

दृदितेन मनसा इत्यर्थः। महापद्मवनं दशमद्वारांतःस्थितसहस्रदलांतःपद्माचावाहनमंत्रः
महापद्मवनांतस्थे कारणानंदविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरीति। तस्मिन्महांत
स्तव कामकलानुसंधानसमाकलितेन स्वानुभवबहिर्भूतबाह्यव्यापाराः पश्यंतः अंतर्मुखे
न साक्षात्कुर्वंतः परमाह्लादलहरीं दधति। एतादृश्याः कामकलाया भावनया समास्वादित
निरतिशयानंदभाजो जीवन्मुक्ता भवंतीति भावः। अयमत्र भावनाप्रकारः। मूलादिब्रह्मरंध्रां
तेषु अष्टसु चक्रेषु मूलाधारमणिपूरस्वाधिष्ठानाहतविशुद्धिआज्ञालंबकाग्रभ्रूमध्येंदुबिंदुअर्द्ध
इंदुरोधिनीनादनादांतशक्तिव्यापिकासमनोन्मनीसंज्ञेषु अष्टादशस्थानेषु विधाकरणि
सर्वं स्वर्वाणि उत्तरोत्तरेषु अदृश्येषु भावनापूर्वकं विलाप्य व्यापिकायां योनिरूपे बङ्गे
विलाप्य तं वस्तु स्थाने बिंदुत्रयात्मके स्वरे विलाप्य उन्मनीस्थाने सपरार्द्धकलां भावये
सूर्यं दहनेन दहनं चंद्रे तं चंद्रं सपरार्द्धकलायां विलाप्य विगलितवेद्यांतर्हृदयपरमा
नंदनिर्भरा योगिनः शिवशक्तिसमवायभावनया तादात्म्यमधिगच्छति। तदुक्तं कादिमते।
इतीरिता कामकलाया बाह्यभावना। पूर्वमेव साधुनार्द्रस्वेसाधनामांतरालिकां मूला

दिवृत्तरं भ्रांतस्फुरदधिकद्युता कर्तिं।ध्यायेत्कुंडलिनीं देवीं तत्त्वविद्यास्वरूपिणीं।षट्चक्रभे
दिनीं देवीं तां च बिंदुमयात्मिकां।नां च सार्द्धकलारूपां चिंतयेत्पद्मकानने।एवं भावनया
जुष्टः परमानंदनिर्भरः।संसारसागरं भीमान्गोष्पदीकुरुते शिवेति भुजगे दयेपि।तत्त्ववि
तानं भावनानप्रकाशितामलादिवृत्तरं भ्रांतं मूलन विद्यां विभावयेत।उद्यदादित्यसंका
शां तडित्कोटिसमप्रभां।तत्र नामंडलं व्याप्तं शरीरं मपि भावयेदिति।एतादृशीं कामभव
नोपायं गुरुमुखाद् वेत्ति स्मरणो तिसएवं जीवतिसएव चाग्नमग्निस्थार मतिच।अ
त्रः पद्मरि वदि षये प्लुतं पदोपवहरती त्यर्थः।तथाचस्मृतिः।मयासोन्नमत्तियो वि
जानीयः प्राणिति यईश्रणोत्युक्तमिति।वाग्भवस्येवसात्त्विकध्यानांतरमहिमानमा
ह॥ ॥सवित्रीभिर्वाचांशशिमणिशिलाभंगिरुचिभिर्वशिन्याद्याभिस्त्वांसहजन
निसंचिंतयति यः।सकर्ताकाव्यानांभवतिवचसांभंगिभुजगैर्वचोभिर्वाग्देवीवद
नकमलामोदमधुरैः॥१७॥चंद्रकांतखंडरुचिभिः वशिनीकामेश्वरीमोहिनीविमला
अरुणाजयिनीसर्वेश्वरीकौलिनी।इत्यष्टवाग्देवताभिः सहहृदयेयश्चिंतयतिसक २५

वीकाव्यानां भवति।वाग्देवीवदनकमलामोदमधुरैर्वचोभिः सरस्वतीमुखांभोजसौ
रभ्यमनोहरैर्वचसां चातुरीभिः भुजगैः नगः ऐश्वर्यं।विविधालंकारोपितध्वनिरूपं तद्वती गौर
भिरितिभावः।एतत्स्यंधकवीश्राणं चेतः इति पद्यानंतरं योजनीयं।अनेन पद्येन वाग्भवस्य
सात्त्विकध्यानानंतरकथनत्वादिति भावः॥ध्यानमभिधायमहिमानमाह॥ ॥भवा नाम ४
नित्वं दासेवितरमपिदृष्टिंसकरुणामितिस्तोतुंवांछन्कथयतिभवानित्वमितियः॥तदैव
त्वंतस्मैदिशसिनिजसायुज्यपदवींमुकुंदब्रह्मेंद्रस्फुटमुकुटनीराजितपदां॥२२॥हे भवानि पदां ६
त्वं दासे मयि सदयां दृष्टिं वितर।इतिस्तोतुमिच्छन्यो वदति भवानि त्वमिति हेतोः तस्मै नि
जसायुज्यपदवीं दिशसि।हरिविधींद्रप्रभृतिदेवतानां स्फुरन्मुकुटनीराजितपदां।
लोकुत्तमं पुरुषशब्दसाम्यमात्रेश्रवणाद्देव वितरसीत्यर्थः।नतु लोके सर्वत्रशिवस्ता
युज्यमेवाभिलषितं मस्मा युज्यत्वाकिमितत्याह॥ ॥त्वयाहृत्वावामंवपुरपरि
तृप्तेनमनसाशरीरार्द्धंशंभोरपरमपिशंकेहृतमभूत्।तथाहिखद्रूपंसकलमरुणा
भंत्रिनयनंकुचाभ्यामानम्रंकुटिलशशिचूडालमुकुटे॥२३॥वामांगरूपयात्वया

पद

अपरिच्छिन्नेन मनसा दाक्षिण्यंगमपि शंभोरपहृतमिति शंके तर्के।तथाहि तत्र हेतुमाह।
हृदं मर्द्धमरुणं संप्रति सर्वमरुणं।हृदेवहि नयनं केवलं मुकुलाकारमधुना त्रिनयनं कु
चाभ्यामानम्रं राशिकलालंकृतकिरीटं।एतेनेहैतुक्तिः शंभोः सर्वं शरीरं हृतमित्यपह्नु
तिरलंकारो व्यंग्यः।एतावता त्वमेव शिवरूपिणी शिवोपि त्वन्मय इति।शिवशक्तिमतोरभेदः
पूर्वोक्तः स्मारितः।त्वं आयुज्यमेव शिवसायुज्यमिति ध्वनिः।।ननु ब्रह्मादयो देवाः सायुज्य
दाने समर्थाः किं न संति भिन्नकाशादेव सायुज्यं न विष्यतीति मैं कोयं निर्बंध इत्यत आह। सायुज्येद
।। ।।जगत्सूते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरय
ति।।सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलति
कयोः।।२४।।ब्रह्मा जगत्सृजति विष्णुरवति रुद्रः संहरति।तैः सह ईश्वरः जगत्तिरोधत्ते।
अयमर्थः।रुद्रेण कार्यरूपं जगत्संहृतं कारणरूपेण तिष्ठति।यथा घटनाशे कपा
लरूपेण कार्यं तिष्ठति पटनाशे तंतुरूपेण कुंडलादिनाशे सुवर्णरूपेण तथा वर्त २६
मानं स्वात्मना सह तिरयति।आच्छादयति।सदापूर्वः शिवः सदाशिवः सर्वमनुगृह्णा

धार

निजात्मनि बीजन्यायेन स्थापयति पुनः सृष्ट्यनुग्रहाय।तदुक्तं शांभवदीपिकायां।।
सृष्टिः स्थितिरुपसंहारस्तिरोधानानुग्रहात्मकं। कृत्यं पंचविधं यस्मात्तं नुमः शाश्वतं शिवमिति।ए
तत्पंचविधं कृत्यं ब्रह्मादयोपि कुर्वंति तेन तव क्षणचलितयोर्भ्रूलतिकयोराज्ञामालंब्य ईष
द्विलासेन स्वस्वकृत्यं कुर्वंति।एतावता तव भ्रूविलासमहिमा एतादृशस्तव महिमानं को
वक्तुं समर्थ इति भावः। सर्वं तवापांगालोके पतितमित्यादिनोपांगमहिमा वर्णितः।अने
न भ्रूविलासमहिमा वर्णित इति।अतस्त्वदाज्ञावर्तिनां ब्रह्मादीनां सायुज्यं प्रयोजनं नास्ति
भिन्नाद ति त्वमेव सायुज्यं परमपुरुषार्थ इत्यर्थः।।इदानीं चरणार्चनमहिमानमाह।। ।।त्रया
णां देवानां त्रिगुणजनितानां तव शिवे भवेत्पूजा पूजा तव चरणयोर्या विरचिता।।तथा
हि त्वत्पादोद्वहनमणिपीठस्य निकटे स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः।।
२५।।तव चरणयोर्या विरचिता पूजा सैव पूजा त्रयाणां देवानां भवति यतस्तव पादोद्व
हनमणिपीठस्य समीपे एते मुकुलितकरोत्तंसमुकुटाः संति।अतस्तेषां पूजा न पृथ
क्कार्या।एतावता शिवपूजा विष्णुपूजयोः सकाशात्तव चरणपूजा विशिष्टतरेति भावः।

तदुक्तं देवीपुराणे। विष्णुब्रह्मसहस्राणि शिवब्रह्मशतानि च। अंबिकाचरणार्चायाः कलां
नार्हन्ति षोडशीमिति॥ चरणसपर्यामहिमानमभिधाय प्रभावमहिमानमाह॥ ॥
विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं विनाशं कीनाशो भजति धनदो याति निधनं॥ वि
तंद्रा माहेंद्री विततिरपि संमीलितदृशां महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ॥ २६॥
विरिंचिर्मृतिं याति विष्णुर्विरामं प्राप्नोति यमो नाशमेति कुबेरो निधनमपि गच्छति माहेंद्री
दृशां विततिः विस्तारः हि ताजागरूकापि निमीलति। दीर्घनिद्रां याति। त्वत्पतिः शिवः महाप्र
लयेपि विलसति। हे सति सदा मंगलरूपे। तव मंगलं कालत्रितयेपि पतितो नास्ति।
अत एव तस्य विरिंच्यादेरिव विरामो नास्ति। सकलसंहारकमहाशयायास्तवैव तना
मस्पर्शकेः साहित्याव तशक्तिरूपाया नित्यानिरतिशयानंदघनायाः ऽविनाभूतत्व
यं प्रकाशः समुज्जृंभते। अतो यो महिमा शिवस्य स तवैव प्रभाव इति भावः। प्रभाव
महिमानमभिधाय सपरिवारायाः सचक्रायाः परदेवतायाः स्वात्मत्वेन भावना २१
फलितमर्थं प्रार्थनारूपमनुसंधत्ते॥ ॥जपो जल्पः शिल्पं सकलमपि मुद्रा

विरचनं गतिः प्रादक्षिण्यक्रमणमदनाद्याहुतिविधिः। प्रणामः संवेशः सुखमखिलमात्मा
र्पणदृशा सपर्यापर्यायस्तव भवतु यन्मे विलसितं॥ २७॥ सर्वोपि जल्पः वाग्व्यवहारो मातृ
कारूपः मातृकात्वन्मयी। अतः शब्दरूपं सकलं जल्पत्वेनैव पर्यवस्यतु। शिल्पं सकलं हस्त
व्यापाररूपं मुद्रात्वेन नवसंतोषकरं भवतु। मुद्राणां हस्तव्यापाररूपत्वात्। गतिः प्रादक्षि
ण्यक्रमणं भवतु। प्रादक्षिण्यक्रमणस्य चरणव्यापाररूपत्वात्। अदनादि भक्षणादि
नस्पनोऽज्यवो ष्पेपस्लेत्यादौ निश्चादिशब्देन ग्रस्यंते। अदनादिकर्माहुतिविधिर्भवतु
विधिवद्धुतं भवतु। प्रणामः संवेशः शयनं प्रणामो भवतु। प्रणामस्यापि दंडवत्पातरू
पत्वात्। निद्रादि सुखमखिलमात्मार्पणदृशा स्वात्मनि परदेवतायाः अभेदेनात्मार्पणबु
द्ध्याय न्मे विलसितं तत्सर्वं सपर्यापर्यायो भवतु। सपर्यावत्संतोषकं भवतु। अयं श्लोका
र्थः भावनाप्रकारस्तु। गुरुः सर्वकारणभूता शक्तिः तेन नवरंध्ररूपो देहः नवशक्तिरूप
श्रीचक्रं। वाराही पितृरूपा। कुरुकुल्ला बलिदेवता माता। पुरुषार्थाः सागराः देहो नवद्वीपः
। त्वगादि सप्तधातुरोमसंयुतः। संकल्पाः कल्पतरवः। तेवकल्पको द्यानं रसतया भाव्यमानाः

मधुराम्लतिक्तकटुकषायलवणारसाः। ऋतवः। ज्ञानमर्घ्यं ज्ञेयं हविः। ज्ञातृस्वरूपानां भावनी नेद१
श्रीचक्रपूजनं नियतिसहिताः शृंगारादयो रसाः अणिमादिसिद्धयः। कामक्रोधलोभमोह
मदमत्सराः पुण्यपापसहिताः ब्राह्म्याद्यष्टदेवताः शक्तयः। पंचदशतानि। ज्ञानेंद्रियाणि कर्मेंद्रि
याणि दश। मन इति। १६ कामाकर्षण्यादयः षोडशदेवताः वचनादानगतिविसर्गानंदहानो
पानाकुसुमा पादानोपेक्षाबुद्धयः [illegible] दयः शक्तयोष्टौ अलंबुसा। कुहूः। विश्वोदनी। वारणा।
हस्तिजिह्वा। यशोवती। गांधारी। पूषा। शंखिनी। यशस्विनी। सरस्वती। इडा। पिंगला। सुषु
नाद म्नाइतिचतुर्दशाख्यः। सो[illegible]भिण्यादयश्चतुर्दशशक्तयः। प्राणापानव्यानोदानसमानाः। ना यः६
कूर्मक गकृकल [illegible] देवदत्तधनंजया [illegible] इति दश वायवः। सर्वसिद्धिप्रदादिबाह्यदशारदेवताः ए
तद्वायुदशकसंसर्गोपाधिभेदेन रेचकः पाचकः शोषकः पोषकः दाहकः। इति प्राणवा
ते३ यु[illegible]मुख्यकेन पंचधा। जाठराग्निर्भवति सारकः उद्गारकः क्षोभकः जृंभकः मोह
कः इत्यपानप्राधान्येन पुनः पंचविधः स मनुष्याणां देहगः भक्ष्यलेह्यचोष्यपेयात्मकं २८
चतुर्विधमन्नं पाचयति। तदुक्तं भगवद्गीतासु। अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रि

तः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति। एवं दशाग्नयः। सर्वज्ञादिदशदेवताः
अंतर्दशारगाः। शीतोष्णसुखदुःखेच्छाः सत्त्वरजस्तमोगुणाः वशिन्याद्यष्टशक्तयोष्टकोण
स्थाः। पंचतन्मात्राः पंचपुष्पबाणाः मन इक्षुधनुः रागः पाशः द्वेषोंकुशः अव्यक्तमहदहंकाराः म
हत्तत्त्वमिति। कामेश्वरी वज्रेश्वरी भगमालिनी। अंतस्त्रिकोणाग्रगा देवता। शुद्धा निरुपाधि
कासपि देवः कामेश्वरः सदानंदघनः पूर्णः स्वात्मैव परदेवता। सलिलनिधिसौहित्यकर
त्ति६ णमेतस्य सर्वस्य विमर्शः। अनन्यचित्तत्वेन च[illegible]द्धिः भावनायामप्रमत्तता उपचाराः। अस्ति
नास्ति कर्तव्याकर्तव्यमुदासितव्यमिति विकल्पानामात्मनि विलापनं होमः। भावना
विषयाणामभेदभावनं तर्पणं। पंचदशतिथिरूपेण कालस्य परिणामावलोकनं। पं
चदशैव नित्याः इति। मु[illegible]हूर्तत्रयं वा मुहूर्तद्वयं वा मुहूर्तमात्रं वा घटिकामात्रं वा भावना
परः जीवन्मुक्तः। तस्य देवता सर्वदा अभिमुखी भवति। चिंतितकार्याण्ययत्नेन सिध्यति। ए
तादृशोपासकस्य जपो जल्पः स्वादिकं सर्वं [illegible] तथैव च भवति नात्र संदेहः। स एव शिवयो
गीति निगद्यते। इति कादिमतेन आत्मत्वेन भावना। अनेन श्लोकेन प्रतिपादिता॥ इदं भा

वनामनिधायएतस्याएवभावनायाहेतुभूतंशक्तिविशेषंप्रार्थयते॥ ॥ददानेदीनेभ्यःश्रि
यमनिशमाशानुसदृशीममंदंसौंदर्यप्रकर मकरंदंविकिरति।तवास्मिन्मंदार
स्तबकसुभगेयातुचरणेनिमज्जन्मज्जीवःकरणचरणैःषट्चरणताम्॥२८॥हेदेवि।दीनेभ्यः
आशानुसदृशींश्रियंअनिशंददानेपुनःअमंदंयथाभवतितथासौंदर्यसमूहरसंविकि
रतिसति।अस्मिंस्तवचरणेमंदारस्तबकसुभगेकल्पवृक्षकुसुमस्तबकमनोहरेममजी
वात्माकरणचरणैःमनसासहषडिंद्रियचरणैःषट्चरणतांयातु।किंकुर्वन्निरंतरमज्ज
न्तेवचरणमंदारगुच्छेभक्तिरससहितानंदमेदुरःसन्विषयांतरव्यापाररहितस्तवस्मा
द्युगलध्यानवशंवदोभवतु।तेनपूर्वोक्तभावनाफलरूपःजपोजल्पइत्यादिसिद्धि
र्भविष्यतीतिभावः॥भक्तिविशेषनिष्ठमभिधायपरदेवतायाःकर्णभूषणमहिमान
माहतद्व्यापनेनचान्यधवसौभाग्यंद्योतयति॥ ॥सुधामप्यास्वाद्यप्रतिभयजराम्
त्युहरिणींविपद्यंतेविश्वेविधिशतमखाद्यादिविषदः॥करालंयत्क्ष्वेडंकवलितवतःका
लकलनानशंभोस्तन्मूलंतवजननिताटंकमहिमा॥२९॥जयंकरजराम्त्युकविना

२९

शिनीसुधामप्यास्वाद्यविपद्यंते।विश्वेसर्वे।विधिशतमखाद्यादेवताः।करालंगरलंभक्षितव
तःशंभोर्नकालकृतनाशस्तस्मान्नास्तीतियत्तस्यमूलंहेजननितवताटंकमहिमादेवता
सुब्रह्मादिषुजराम्त्युहरणकारणमस्तिकार्यंनास्तिजराम्त्युराहित्यरूपंशिवेमृत्युफलंनपं
नास्ति।मृत्युकारणंविषभक्षणमस्तीइतिविशेषोक्तिविभावनालंकारौव्यंग्यौ।सुधामप्या
स्वाद्यम्रियंते।गरलमप्यास्वाद्यनम्रियतेशंभुरितिविरोधाभासःसाक्षात्।नवैवताटंक
महिम्नाविषंकवलितमस्त्वतमच्युतंस्वयंचमृत्युंजयोजातः।किंताटंकयुगलंगरुडोद्गा
रमणिविशेषघटितंआहोस्विद्विषहरयंत्रद्वयंवाइतिवितर्कोव्यंग्यः।अन्यासांदेवस्त्रीणां
सौभाग्यंनश्वरंभर्तारयेपिनश्यंतितयासहशिवस्याविनाभावःसार्वदिकइतिपर्यवसितो
र्थः॥ताटंकमहिमानमुक्तापरदेवतायाःप्रभावमहिमानमाह॥ ॥किरीटंवैरिंचंप
रिहरपुरःकैटभभिदःकठोरेकोटीरेस्खलसिजहिजंभारिमुकुटं॥प्रणम्रेष्वेतेषुप्र
सभमभियातस्यभवनंभवस्याभ्युत्थानेतवपरिजनोक्तिर्विजयते॥३०॥पश्यमातः
अयंब्रह्मणाप्रणतोस्ति।अयंविष्णुमेतस्यमुकुटंपरिहर।कठोरतरमुकुटेदाघातेनतव

चरणेषु कुमारतरौ यतो न सहेते। कैटभभिदः कठोरे कोटीरे स्खलनसंभ्रमवशात्। न च
श्रांतासती त्वर्थः। अतस्तदपि परिहरेति भावः। जहिहि जंभारिमुकुटं। अतएव वत्सजं। इति
प्रणतेषु देवेषु ससंभ्रमं हठात्। जगन्मातास्तं प्रति देवगणैः सेव्यमाना वर्त्तते ना
यमवसरस्तवेति वदतो दौवारिकान् विज्ञाप्य अनिसुखमागतस्य हरस्य अभ्युत्थाने
तव परिजनोक्तिर्विजयते। सर्वोत्कर्षेण वर्त्तते। सोऽत्राप्य महिमानमभिधायाऽपरदेव
मंत्रं ६ तायाः कादिमतस्वतंत्रतंत्रानुसारेणोद्धृतं स्वतंत्रतंत्रमहिमानमाह॥ ॥चतुःषष्ट्यातं
त्रैः सकलमतिसंधाय भुवनं स्थितस्तत्तत् [illegible] सिद्धिप्रसवपरतंत्रैः पशुपतिः॥ पुनस्त्व
न्निर्बंधादखिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिदं॥३१॥ चतुःष
ष्टितंत्रैः सकलं भुवनमभिसंधाय समस्तलोकं वशीकृत्य काश्चित्तत्तत्सिद्धिप्रसवप
रतंत्रैः। तासु तासु सिद्धिषु हठात्परतंत्राणि। कश्चिद्धर्मः कश्चिदर्थः कश्चित्कामः कश्चिन्मोक्ष
इति। एकैकपुरुषार्थप्रदोपासनानिदेशकैस्तैस्तैर्भुवनं सकलपुरुषार्थसिद्धिर्नास्त्यर्थः।
पुनस्त्वन्निर्बंधादखिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिति

अवतारितवान्। णिश्रिद्रुस्रुभ्यः कर्त्तरि चङिति चङि द्वित्वे कृते सन्वल्लघुनीति सन्व
द्भावे कृते सन्यत इतीत्वे कृते दीर्घो लघोरिति दीर्घे कृते इत्वे अत्विश्चकारलोपे कृते अवातीतर
दिति लुङि रूपं। तथा यानि तंत्राणि चतुःषष्टिसंख्यानि कलनानि तानि सकलपुरुषार्थप्रका
शानि न भवंति। तंत्रमेकं तथा अवतारयद्यथा सकलपुरुषार्थसाधनं भवति। इति देव्या
निर्बंधेन ते स्वतंत्रं कादिमताख्यं अवतारयामास पशुपतिः। अन्यानि यानि तंत्राणि अन्या
न्यसापेक्षाणि इदं तंत्रं अन्यानपेक्षं। एतावता अनादिसिद्धमेवैतत्तंत्रं भवतीति स्वत
त्रं दत्तचतुःषष्टितंत्रापेक्षया विशिष्टतां प्रतिपादयतदनुसारिणीं तो नामानुज्ञाविधां पं
चदशाक्षरीं दौर्वाससीं त्रयोदशाक्षरीं चैकहेलया हरति॥ ॥शिवः शक्तिः कामः क्षि
तिरथ रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः॥ अमी हृल्लेखाभिस्ति
सृभिरवसानेषु घटिता भजन्ते वर्णास्ते तव जननि नामावयवतां॥३२॥ शिवो हः शक्तिः सः
कामः कः क्षितिर्लः। अपेसनंतर्याभिधानात्। शिवादिवर्णचतुष्टयेऽवसाने सहितं च
कारात् ह्रल्लेखाभिः सह अविश्लेषः सूचितः। परा सः मारः कः हरिर्लः। अमी हृल्लेखाभिः
रविर्हः। शीतकिरणः सः। स्मरः कः। हंसः सः। शक्रो लः। तदनु च तत्समात्। तद

भुवनेश्वरीबीजैः सर्वेषां प्राणिनां हृल्लेखैव जागर्त्ति प्राणशक्तिरूपा मंत्राणां जीवरूपा जागर्त्ति तस्मात् हृल्लेखेत्युच्यते। तथा च स्वच्छंदसंग्रहे। शिवा विना स्तता चिच्छक्तिः स्वतंत्रा निरुपद्रवा। समस्तं व्याप्य भुवनं माये ते नेश्वरी मता। व्याप्तं तेन समकं जगन्मया चिद्विजास्यया। यस्मादखिल जीवानां मंत्राणामपि सर्वशः। हृदि नेत्रेव जागर्त्ति प्राणशक्तिरियं मता। हृल्लेखा कथ्यते तस्मान्मायाचा चिन्मवैज्ञवात्। अनया रहिताः सर्वे निर्जीवा मंत्रराशयः। अतस्तत्सर्वमंत्राणामियमुद्बोधिनी मतेति। प्रपंचसारे भुवनेश्वरीस्तोत्रेपि। प्रसीद प्रपंचस्वरूपे प्रधानप्रहृत्यात्मिके प्राणिनां प्राणसंज्ञे इति। तिस्र इति अवसाने धुरि शिवादि वर्णचतुष्टयं रव्यादि वर्णपंचकं परादि वर्णत्रयं विरामेषु घटितानि लितावर्णास्त्व वजननिर्वयवतां नजंते। नामत्रतिशयेने तियावत्। मंत्ररूपिण्यास्तव एते वर्णा अवयवाइत्यर्थः। अथवा मंत्ररूपस्य तव नाम्न एते अवयवा नाम्नो अवयवत्त्वं तावर्णाइत्यर्थः। एतावता मंत्रवाचकः। अचिंत्यवैभवा तं वाच्येतिसंपन्नो र्थः। तथा वाचकादिमते। सर्वे मंत्राः समुद्दिशाः परतत्वार्थवाचकाः। तस्मात् सर्वमंत्रे रक्तशक्तिस्त्वं प्रतिपद्यस इति। ज्ञानार्णवेपि। वा ३१

च्यवाचकरूपेण सर्वे मंत्रा व्यवस्थिताः। यद्देवतायायो मंत्रस्तस्या मंत्रः स वाचक इति। अवयवतां नजंते। ह्रींकारस्यावयविन एते वर्णा अवयवाः। ह्रींकारस्यैव प्रपंचः सर्वोपि मंत्र इत्यभिप्रायः। मदुक्तं भगवता शंकराचार्येण व्रह्लतकमस्क्रतो। ह्रींकारमेव तव नाम गृणंति वेदा मातस्त्रिकोणनिलये त्रिपुरे त्रि[illegible]नेति। त्रयोदशाक्षरा वरीयविद्या अधुनैवाभिधीयते। शिवो हः शक्तिः सः कामः कः क्षितिर्लः। अथानंतरं। अंतरं विना। रविर्हः शीतकिरणः सः स्मरः कः हसो हः शक्रो लः। तदनुतदनंतरं वकारा सर्वेषां वर्णानां समुच्चयद्योतकः। परा सः मारः कः हरिर्लः। हल्लेखा [illegible] अमी वर्णास्त्रयोदशसंख्यकाः नामावयवतां नजंते। आलिस्त्विति। निर्हल्लेखान्निरित्यर्थः। अवसाने धुर्यौक्त प्रकारेण घटितास्तव नामावयवतां नजंते। एकहल्लेखया विद्याद्वयोपक्रमोगुरुपरंपरागतः सर्वात्मना गोपनीयः। तथा वाचकादिमते। स्वतंत्रतंत्रे प्राणेषा हंसदाहृदक्तिस्वेलीलितेरिता। हंसाद्यया यामध्यस्यादादिमध्यस्थहंसया। इतीयाप्रज्ञतिः सैव[illegible]वीतिं रत्नमाप्येति। सोपा[illegible]इति विद्यामुद्धृत्य कामराजविद्यामुद्धरति॥ ॥स्मरं योनिं जक्ष्मीत्रितयमिदमाद्यं तव मनोर्निधायैके नित्ये निरवधिमहाभोगरसिकाः॥ त्रपंति त्वां चिंतामणि

हृत्

गुणनिबद्धाक्षवलयाः शिवाग्नेरनुहुतास्सुरभिघृतधाराहुतिशतैः ॥३३॥ स्मरः कः योनिर्यएः
न इती ईः । इदं त्रितयं तव मनोः आद्ये मम मेरुदाढ्ये रत्रमेनिधाय आदेशी सत्यए के निरव
धिमहाभोगरसिकाः दुःखसंभिन्नसांसारिकपुत्रकलत्रधनश्रीइत्यादिसंपत्संततिं अवि
रतिं समनुभूय पापस्यानर्ह भोगानुदर्शयादि देवांगनानि सहनानो विलासपुरस्सरमनुभ
वनमनुवर्तमानमिच्छंतः जपंति मंत्ररूपिणीं त्वां चिंतामणिगुणनिबद्धाक्षवलयाः । चिंता
मणिमालिकागतद्रूपोगुणः तस्मिन्निबद्धाक्षवलयाः । अकारं मेरुं कृत्स्न अनुलोमप्रतिलो
मतया वलयाकारेण भ्राम्यमाणा अकारादि हकारपर्यंता अक्षमालाः । शिवाग्नौ । शिवश
क्तिरूपवागीश्वरीवागीश्वरसंमेलनजातवह्नौ सुरभिघृतधाराहुतिशतैः घृतधाराहुतिश
तैः मातृकाक्षमालया मंत्ररूपिणीं त्वां ध्यायंतः येजपंति । तथा अनवरतघृताहुतिशतैरनुहु
ति तेषां सांसारिकाभोगा ऐहिकामुष्मिका अनवरतमनुभूयंते इति भावः । हिमित्येन त्वम
नोराद्ये रूपे वर्णत्रयं स्मरं योनिं लक्ष्मीं क्रमेण निधाय विधायेत्यर्थः । अव्ययानामनेका ३२
र्थत्वात् । उपसर्गो विधानद्योतकः । हकारादिवर्णत्रये पस्मरादिवर्णत्रयं पंचदशेत्यर्थः । एवं

वायोजना कार्या । अन्यत् सर्वं पूर्ववदेव योजनीयमिति भकारा[illegible]र्थः । परमार्थस्तु । निरवधिमहा
भोगरसिकाः अखंडानंदसंविदुल्लाससलक्षणात्मानुभवपर[illegible]रमपुरुषार्थरसिकाः नित्ये
मनसा मंत्ररूपां भावयंति । किं कृत्वा चिंतामणिगुणनिबद्धाक्षवलयाः प्रज्ञावार्थः सत्त्वार्थः
विगतार्थः स्वरहस्यार्थः पुरनरहस्यार्थः इति मंत्रार्थः पंच । तेषां पर्यालोचनं । मणिरिव माणिः प्रका
शमानं तस्य गुणः पर्यालोचनं परमरहस्यार्थरूपा या विमर्शशक्तिः महाप्रकाशशिवाविनाभा
वेन भावनात् पानि बद्धाक्षवलयानि गृहीत चक्षुरादिबाह्येंद्रियव्यापाराः । शिवाग्नौ शिवोह
मिति ज्ञानाग्निः हंता विनाभावमहाप्रकाशे [illegible] सुरभिघृतधाराहुतिशतैः सुरभि विषयासंग
वासनानद्रूपा अमृतधारास्नेहपरंपरातां जुह्वंतः । प्रलयं प्रापयंतः । प्रज्ञावार्थादि पंचार्थपरा
मर्शेन प्रकाशमानेन शिवाविनाभूतन चिच्छक्तेः [illegible] वनयानि बद्ध्यापाराः शिवोहमिति ज्ञा
नाग्निहंता तेजसि । अनात्मभूता हंताविजृंभितविषयासंगवासनां स्नेहपरंपरां दहंतस्त्वां
जंति । विभ्रांतिनिर्विकल्पसमाधियोगाद्धन्यास्खड्क्रियायोगेन परमानंदनिर्भरस्वभावस
वेदनमनुभवप्रभवंतीति भावः । तदुक्तं शिवनाथितपरास्तोत्रे । अहमिप्रलयं कुर्वन्निद

मःप्रतियोगिनः। पराक्रमपरोकुंडेः स्वभावमशिवापहमिति। अत्र नुकंत इति नोऽयमस्ताच्छ
दितिनुमो निषेधाच्छांदसं पदं। भगवतः शंकरावतारस्य शंकराचार्यस्य वचनं छांदसमेव
केवनमुक्तना इति पाठं कल्पयंति। तदपि छांदसमेव। आनुक्तानःसु पन्नोक इत्यादौ छंद
स्येवात्मनेपदप्रयोगो दृश्यते। न तु लौकिकेऽपि। अथवा नुक्तः सुग्विशेषः। तदंतःसुर
भिघृतधारा इति शतैः जुह्वन्मथागतगोघृतधाराशतैः शिवाग्नौ महामहाभोगरसिकाम
हाभोगः पूर्णाहुतिः तं इति कारस्त्वां यजंति। जपहोमादिभिस्त्वामुपासते धन्या इति
भावः। इति प्रकटार्थो योजनीयः। परमार्थविषयेऽर्थांतरं वा। चिंतामणिः चिंताप्रसाद
कं मन इत्यर्थः। तद्रूपो गुणः तस्मिन्निब ध्यानवत्तया मनसा चिंत्यमानाकारादिक्षका
रांतावर्णमालाइत्यर्थः। शिवाग्नौ शिवोहमिति पूर्णाहंतामये संविदग्नौ जुह्वतः। सुरभि
घृतधाराहुतिशतैः जुह्वः उन्मनीतदंतः सुरभिः सर्वासनधर्माधर्मौ तद्रूपघृतधाराः सं
हधाराः। तासामाहुतिशतैः। महाभोगरसिकाः पूर्णाहुतिपरायणाः। त्वां भजंति मनसा ३३
भाव्यमानं वर्णमयमालया हलादिब्रह्मरंध्रांतं कुंडलिनीरूपं विचिंत्य शिरासनउन्म

नीमार्गेण सर्वासनधर्माधर्मानुबंधस्नेहपरंपरां सोहमिति। विचिंत्यमानः शिवाग्नौ पूर्णाहुतिं कु
र्वाणा अंतर्यागपरायणास्त्वां भजंति। एवंविधांतर्यजनपरमां सिद्धिं लभंत इति तात्पर्यार्थः। तथा चां
तर्यागमंत्रः। प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा धर्माधर्मकलास्नेहं पूर्णाग्नौ जुहोम्य
हमिति। एवंविद्याद्वयोद्धारेण सर्वो कामेश्वरविद्यास्पष्टीकृता। नंदिकेश्वरविद्या च कामराजविद्यो
द्धारे। श्रुतिः अथर्वणवेदे सौभाग्यकांडे। कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्र
मिंद्रः। पुनर्गुहा सकला मायया च पुरुरूपेषा विश्वमातादि विद्येति। ऋग्वेदेपि। इंद्रो मायाभिः
पुरुरूप ईयत इति। अस्यार्थः। इंद्रः इच्छया त्रोपनीतसकलसंपद् ऐश्वर्यपरमेश्वर्यानुभवशी
लानुभवकेऽरूपोपाधिः परमः शिवः लकारः माया अभिः हृल्लेखाभिः बहुरूप ईयते ज्ञाय
ते। तथा हि। हृल्लेखा चतुर्धा षोढा चतुर्धा सांगोपांगाः त्रिकला वर्तिते तत्र हकारः रेफः ईकारः बिंदुः
नादस्मप्तिरिति। पंचधा भागेन वाग्भवोत्पत्तिः। हकारः रेफः बिंदुः त्रयं तस्मप्तिरिति षोढाभा
गेन कामराजोत्पत्तिः। हकाररेफः ईकारः बिंदुः [illegible] रिति चतुर्धा भागेन शक्तिकूटो
त्पत्तिः। हकारेण प्रकाशरूपेण परमशिवरूपेणकारस्य कामस्योत्पत्तिः रेफेण शक्ति

१ ति भाभा त्रि भभ वंति

रूपेण एकारस्य शक्तिरूपस्योत्पत्तिः। ईकारेण परप्रकाशादिनान्तश्चिच्छक्तिरूपेण इ
कारस्य चिच्छक्तिरूपस्योत्पत्तिः। बिंदुनानादरूपेण परमैश्वर्यसमुन्मुखं चित्तस्य लकार
स्येंद्रोदयः। एतेषां समष्ट्या समस्तमंत्रोत्पत्तिः। हकारेण हकारस्योत्पत्तिः। रेफेण शक्ति
रूपेण शक्तिरूपस्य सकारस्योत्पत्तिः। रुद्रो वा एष यदग्निरिति श्रुतेः। चंद्ररूपेण बिंदुना
शिवरूपेण शिवरूपस्योत्पत्तिः। तथा चाष्टमीमूर्तिश्चंद्रमाः शंकरस्येति पुराणवा क्यं।
लकारस्य शिवरूपत्वं श्रीकंठादिमध्ये पठितत्वात्। तथा च शारदातिलके। श्वेतोन्त्यश्वी
शान्तेऽक्षि शिवाः सवृत्तकस्तथेति। एतेषां समस्तानां समस्तकामराजोत्पत्तिः। हकारेण
कलारूपेण केवलानिधिरूपस्य सकारस्योत्पत्तिः। तथा च संकेतपद्धतौ। अकारः स
र्ववर्णाग्र्यः प्रकाशः परमः शिवः। हकारोन्त्यः कलारूपो वर्णोऽहंता प्रकाशक इति। रेफेण
वह्निना रजोगुणेन रजोगुणप्रधानस्य ब्रह्मणः ककारस्योत्पत्तिः। ईकारेण श्रीरूपे
ण सकलाधाररूपस्य लकारस्योत्पत्तिः। एतेषां समस्यास्तकलशक्तिकूटोत्पत्ति
रिति। किं बहुना शिवशक्त्योर्हरेफयोः श्रियासकलं विलसितं विश्वमिति तात्पर्यार्थः। इ

तीयकूटस्य। तदुक्तं कादिमते। विद्यातृतीयखंडेन सकलार्थो निधीयते। तेनेदं विश्वमखिलं ब्रह्म
स्वात्मकमीश्वरि। शिवशक्तिसमायोगादुदेतीदं विजृंभत इति। एतेन ह्रींकारस्यैव सर्वमंत्रप्र
पंचित इति स्पष्टीकृतोऽर्थः। एतस्या विद्यायाः पंचदशाक्षरीत्वं पंचपंचदशवर्णात्मकेन रूपेण
न भवति किं तु ज्ञायते वर्धते विजृंभते परिणमते नश्यतीति दशापंचकयुक्तस्य प्रपंचस्य सा
क्षिणी आद्यक्षररसंबंधिनी तेन पंचदशाक्षरी पंचदशा यस्याः सकाशादिद्यंते संति
तेन पंचदशा। पंचदशा चासावक्षरा चेति पंचदशाक्षरी। तदुक्तं मानसोल्लासे। दशापंच
कभेदेन प्रपंचस्य विलासिनः। साक्षिणी चाक्षरा यस्मात्तस्मात्पंचदशाक्षरीति। इति लो
पामुद्राकामराजविद्ययोः संक्षेपेण महिमा निरूपितः। अन्यच्च सर्वं भावार्थादिवाक्यार्थ
विवेचनं विद्यारण्यश्रीचरणरचितविद्यार्थदीपिकायां योगिनीहृदये च द्रष्टव्यं॥ एवं वि
द्याद्वयमुद्धृत्य इर्वेकानां श्रीनां षट्पंचाशदित्यादिना षडन्वयशांभवानामुद्गमस्तन
वात्मकमिथुनविद्यायास्तात्पर्यार्थत्वमकत्वमिति पाद्यद्वयोः शिवशक्त्योरत्ते दर्शितौ इति॥ ॥
शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं तवात्मानं मन्ये भगवति नवात्मानमनघं॥ अ

तः शेषः शेषीत्युभयसाधारणतया स्थितः संबंधो वां समरसपरानंदपरयोः ॥३४॥ हे
भगवति त्वं शंभोः शरीरमसि। यतः शशिमिहिरवक्षोरुहयुगं। शिवशक्तिरूपं हकारसका
रमयं। सूर्यचंद्ररूपस्तनद्वयमित्यर्थः। अत एव तवात्मानं अनघं। आपाततो दृश्यमाण
प्रपंचविलासविभ्रमरहितं तवात्मानं नवात्मकं नवाहारकूटविद्याप्रतिपाद्यं शिवं मन्ये।
तथा च प्राचीनाभियुक्तवचनं। पातालपादमवनीजघनं रवींदुवक्षोजशालिदाननम हरि५
मकेशं। वैराजमंब तनुजतां तव दिव्यरूपं क्रीडायते विधिहरीश्वसुरादिकोटिरिति। अतः
शेषः शेषीति अयं संबंधः गौणमुख्यभावरूप इत्यर्थः। उभयसाधारणतया प्राधान्येन
स्थितः। समरसपरानंदपरयोः ऐकात्म्यसमुल्लासितपरानंदनिर्भरयोः। राज्ञः पुरुष
इत्यादिवत् शेषशेषिलक्षणशेषशेषिभावो नास्ति। समप्राधान्यादिति भावः। हंत तर्हि
एकसंधिस्थितोः परं प्रपंच्यत इति व संबंधस्य समप्राधान्ये प्रतिपाद्यमाने अनयोः
शेषशेषिलक्षणं। अप्राधान्यपर्यवस्यतीति न शंकनीयं। तयोः संबंधः तौ सम ३५
प्रधानौ संबंधस्तु न प्रधान इत्येव प्रतिपाद्यते ज्ञि इ संबंधिनोः प्रतीयमानं शेषत्वं ता

त्विकं न भवति। आश्रितं संबंधशेषित्वं द्वयोरप्युल्लाति। यथाहुरभिनवगुप्तपादाः। शेषपोषणल
क्षणगुणभावो न तात्त्विकः। भृत्यादिगौरवस्यापि भर्त्रादिगुणभाववदिति। तथा च शिवश्च श
क्तिश्च शिवशक्ती। उभयपदार्थप्रधानो द्वंद्वः। तयोः संबंधस्तु उभयप्रधानगतः। ननु गौणमुख्यसंबं
धघटित इति सिद्धं। यथा शब्दार्थयोः संबंधः। अमुमेवार्थं हृदि निधायाह भगवान् सरस्वतीपु
त्रः कालिदासः। वागर्थाविव संपृक्तावितिपद्येन। तथा चाचार्यवर्येण क्षतिरपि सौजन्यकांडे।
भगः शक्तिर्भगवान्कामदेवः आदातारावि हसौ जगतां। समप्रधानौ समसत्त्वौ समौजौ त
योः शक्तिरजितावि [illegible] श्वयोनिरिति। नवात्मकविद्यायाः स्वरूपं प्रतिपाद्य षडध्वेयपरा भवा
नां मनः प्रभृत्य पिदशो भगवदंबिकायाः एवैकं प्रतिपादयति। ॥ मनस्त्वं व्योम त्वं मरुदसि
मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परं। त्वमेव स्वात्मानं परिणम
यितुं विश्ववपुषा चिदानंदाकारं शिवयुवतिभावेन बिभृषे ॥३५॥ मनस्त्वं व्योम त्वं मरुद
सि। मरुत्सारथिरसि वह्निरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां विराड्रूपेण वद्धि प्रा
माण्यां न हि परं त्वदतिरिक्तं न किंचिमर्व त्वद्रूपमेवेत्यर्थः। हे हरमहिषि। त्वमेव स्वात्मानं

वस्तुतस्त्विदानंदरूपं परिणमयितुं विराड्रूपेण प्रकल्पयितुं भावेन सा भाविशेषेण विश्व
वपुषा विश्वाख्यजीववपुषा बिभ्रषे पुष्णासि। विश्वाख्यविराट्शरीराभिमानिजीवरूपं भावेन २
स्यर्थः। पंचीकृतपंचमहाभूतादितत्कार्यं सर्वं प्रपंचो विराडित्युच्यते स्थूलं शरीरमेतदात्म
नः स वै इंद्रियैरर्थोपलब्धिर्जाग्रदवस्था। एतदभिमानी विश्वाख्यो जीवः। विश्वाख्यजी
३५ वरूपेण विराट्शरीरेण बिभ्रषे इत्यर्थः। विश्ववपुषेत्यत्र पदद्वौ पान्तैजसप्राज्ञावपि गृ
हीतौ विश्वादिवपुषा विश्ववपुषेति मध्यमपदलोपी समासो वा। अपंचीकृतमहाभूतानि
तत्कार्यं सप्तदशकं। भौतिकं हिरण्यगर्भ इत्युच्यते तत्सूक्ष्मशरीरमेतदात्मनः। स्वप्नावस्था
जाग्रदवस्थाविषयानुभवजन्यसंस्कारः। एतदभिमानी जीवस्तैजस इत्युच्यते। तैजस
जीवत्वेन सूक्ष्मशरीरं बिभ्रषे। बाह्यांतरसकलविषयव्यापारे निवृत्ते केवलबुद्धिमा
त्रावस्थानं। कारणरूपेण सुषुप्तिः तत्कारणशरीरमात्मनः। तदभिमानी प्राज्ञः। प्राज्ञ
रूपजीवभावेन कारणशरीरं बिभ्रषे इत्यर्थः संपन्नः। एतेन भगवत्याः प्रणवरूपता प्र ३६
तिपादिता। तथा च नवरत्नमालायां। मातृकां प्रणवरूपिणीं मनसि भावयामि परदे

वतामिति। तथा स्कांदेपि। ओंकाररूपिण्यजरा शिवा तत्राम्न इ चेति। रुद्रयामलेपि। उमेति पर
माशक्तिः स्वर्भावमुपेयुषी। अधुष्टवलयाकारा प्रणवत्वमुपागतेति। अथवा चिदानंदरूपं
विश्ववपुषा विश्वादिजीववपुषा परिणमयितुं स्वात्मानं बिभ्रषे। अथवा हरमहिषिभावे
न शिवपत्नीभावेन बिभ्रषे। संज्ञायां ह्रस्वः कालिदासादिवत्। हरयुवतिभावेनेति वा वि
पाठः। अहो तव चरितं को वेत्तुं समर्थः। तथा सकलजननी त्वं वे। सुता दक्षस्यादौ किल
सकलमातस्त्वमुदभूः सदोषं तं हित्वा तदनु गिरिराजस्य तनया। अनाद्यंता शंभोर
पृथगपि शक्तिर्भगवती विवाहाज्जायासीरहह तव को वेत्ति चरितमिति। इति मनःप्रव
त्तिः महे कं भगवत्याः प्रतिपाद्यमानस्तादिषडन्वयशांभवानां मुखान्त नोदेव
देव्यो पूजाचक्रसहितो क्रमेण स्तौति॥ ॥तवाज्ञाचक्रस्थं तपनशशिकोटिद्युति
धरं परं शंभुं वंदे परिमिलितपार्श्वं परिचिता॥ यमाराध्यन्भक्त्या रविशशिशुचीनामवि
षये निरालोकेऽलोके निवसति हि भालोकभुवने॥३६॥ तवाज्ञाचक्रस्थं भ्रूमध्यद्विदल
पद्मकर्णिकामध्यगतं सूर्यचंद्रकोटिकांतं परं शंभुं परशंभुनाथं परिमिलितपार्श्वं

पौरैश्चितां चित्परां त्वया विना भूत वामांगं यमाराध्यन्ते भक्तपारविशाशिश्चर्चा नाम विष
ये सूर्यचंद्रवह्नीनामगोचरे तालोकभुवने तालोकास्तेजोलोकाः अपरिमिततेजःसमू
हानां भुवने सर्वतेजसां कालत्रयानपेक्षिनिवासस्थाने। तथा च श्रुतिः। न यत्र सूर्यो न
विभाति चंद्रमा नाग्निर्नान्यानि तेजांसि यद्भासा सर्वमिदं भासते सर्वासां भासामेकमा
यतनं समस्तेऽपि भ्रस्फुः। अमृतोऽक्षरोऽनंतोऽजरो निरालंबः परमात्मेति। निरालो
के निर्गता आलोका यस्मात्। तांत करति कचित्पाठः। कालत्रयेऽप्यविनाशिनि लोकेऽन
ति भावितपरमानंदमेदुर महाशयो निवसति। नितरां वसति। निरतिशयानंदस
च्चिदानंदमहाप्रकाशे विजृंभते। ब्रह्मसाक्षात्कारे अभयं वीतशोको भवतीति भा
वः। इति निष्कामानामुपासना। सकामानां तु यमाराध्य भक्तपापुरुषाः सूर्यचंद्रव
ह्नीनामगोचरे निरालोके आलोकांतरं तत्प्रकाशकं नास्तीत्यर्थः। स्वयंप्रकाशे आलो
कभुवने। नानाविधरश्मिविशेषश्चतुःषष्टिरश्मिमध्ये परिगणितस्तस्यालोकभुवने निव
सति। इच्छामात्रोपनीतनानाभोगरसिकः। सकलतेजोलोकोपरिवर्तमानो महा ३१

शयो विजृंभत इति भावः। मध्ये परः शंभुनाथः। चित्परं ब्रह्मेति देवदेव्योः अज्यो। परितस्तुः पश्चिमा
नसारसमयः पूज्या ध्येया वा। क्रमप्राप्तं नाभसरश्मिमुख्यो देवदेव्यौ प्रस्तौति॥ ॥विशुद्धौ ते शु
द्धस्फटिकविशदं व्योमजनकं शिवं सेवे देवीमपि शिवसमानव्यसनिनीं॥ ययोः कांत्या यांत्याः शशि
किरणसारूप्यसरणेर्विधूतांतर्ध्वांता विलसति चकोरीव जगती॥३७॥ विशुद्धौ ते कंठस्य षोड
शदलपद्ममध्ये तु निर्मलस्फटिकाच्छं व्योमजनकं गगनकारणं शिवं व्योमेश्वरं सेवे देवीम
पि। अपिः समुच्चये। व्योमेश्वरीं गिरिशसायुज्यपदवीं शिवसायुज्यसरणिं। चिदानंदमहाप्र
काशापरंपरां शिवां विना भूतां। इयमेव पदवी शिवसायुज्यस्य। इमां विना शिवसायुज्यस्य
दुरूहत्वादिति भावः। तदुक्तं स्कांदे। वामाश्रितां महाभागे प्राक्कवंत्य चिरेण मां। केवलं त्वा
मनाहत्य मामजं तो विचेतनाः। नार्हंति मम सायुज्यं ब्रह्मकल्पशतैरपीति। ययोः कांत्या आ
यांत्या हेतुं विना। शशिकिरणसारूप्यसरणिः। चंद्रिकासमानसरणिः। सुषुम्नामार्गेण
प्रविश्य सकलशरीरांतरालमाप्लावयंती विधूतांतर्ध्वांतानि दूरतबाह्यविषयव्यासंगा तिमि
रा जगती जंगमा चकोरीव विलसति। चकोराय था चंद्रिकां नः पातिनी चिरसं चितां तरला

सौं॰ल॰

पंविधूयविलसतितयेत्यर्थः। अथवाम्भलाधारस्यजगतीमहःपयोःकांत्याआर्यांत्याशशि
किरणसारूप्यसरणिःविधूतांतर्ध्वांताविगतसुषुम्णारंध्रनिरोधकवातपित्तादिदोषाः
।चकोरीवविलसति।अथवाययोःकांत्याआर्यांत्याशशिकिरणानांसारूप्यंयस्यांसाश
शिकिरणसारूप्यसरणिःसासर्वाजगतीमहमिविधूतांतस्तिमिराविगलितगिरिकंदरा
दिगततिमिराचकोरीवविलसति।सकलजन्मतिमिर्ययोःकांतिपटलाछादितार्द्धांकचको
रीविशोन्ननेइतिभावः। एतादृशौदेवदेव्यौचक्रेपूज्यौध्येयौवा। व्योमेश्वरव्योमेश्वर्यौ
वानाभस्तरश्मयः इत्योक्तादिसप्ततिसंख्याकाःपरितःक्रमप्राप्तवायव्यरश्मिमुख्यौदे
वदेव्याविति॥ ॥समुन्मीलत्संवित्कमलमकरंदैकरसिकंभजेहंसद्वंद्वंकिमपि
महतांमानसचरं॥ यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्तेदोषाद्गुण
मखिलमद्भ्यःपयइव॥३८॥ समुन्मीलत्संविन्मैवकमलमकरंदःअथोहृदयकम
लमकरंदःतत्ररसिकंनिरतिशयानंदसंविदुल्लासरूपहृदयकमलगतानुभवविशेष ३८
शेषपुष्परसास्वादनपरमित्यर्थः। भजेहंसद्वंद्वंहंसेश्वरहंसेश्वरीरूपंकिमपिस्वानु

भवैकसंवेद्यत्वादिदमित्तिनिर्वक्तुमशक्यंमहतांमानसचरं। आपातमधुरसांसारिकसुखवि
निस्पृहाणांमहाशयानांमानसचरं। यदालापादष्टादशगुणितविद्यापरिणतिः। चत्वारो
वेदाः उपवेदाश्चत्वारः अंगानि पुराणन्यायमीमांसाधर्मशास्त्राणीत्येवमष्टादशविद्या
नांपरिणतिः अत्रेयंयोगशास्त्रप्रक्रिया सर्वेषांप्राणिनांहृदयकमलवर्तिहंसद्वयंशि
वशक्तिरूपमस्ति। तदुक्तंतत्रैवयोगानुशासने। अनुपममनुभूतिःस्यात्संवेद्यमाद्यंवितत
सकलविद्यालापमन्योन्यमुख्यं। सकलनिगमसारंसोहमोंकारगम्यंहृदयकमल
मध्येहंसयुग्मंनमामीति। तस्यहंसयुग्मस्यजाग्रत्स्वप्नसुषुप्तयस्तिस्रोवस्थाःतत्र
जाग्रदवस्थायांयदासत्वगुणाधिक्यंतदाआलापोभवति। वेदशास्त्रादिरूपोदेहिनः।
यदारजोगुणःप्रभवतितदाप्राणिनामाहारादिव्यवहारः। यदातमोगुणःप्रभवतित
दाक्रोधनिद्राभयहिंसादिव्यवहारः। यदादत्तेदोषाद्गुणमखिलंचिदानंदरूपस्यब्रह्मणः
देशकालादिपरिच्छिन्नस्वरूपात्। गुणमखिलंमायाशबलनयासमुल्लसितदेश
कालादिपरिच्छेददोषपरिहारेणशुद्धसंविन्मात्रकंनिरतिशयानंदरूपंगुणमादत्ते।

अध्यः पयस्वयथाऽऽत्मस्वरूपं दोषं परित्यज्य सारस्त्वतं क्षीरस्त्वागं हंसोऽयथाऽऽदत्ते तथे
ति एतेन हंसः सोहमिति । हंसयुग्मं महावाक्यार्थबोधकं हंसेश्वरहंसेश्वरीरूपं न जेऽन्ति
तात्पर्यार्थः । हंसेश्वरहंसेश्वर्यौ मिथ्येह ध्येयौ । ध्येयो वा । चतुःपंचाशदक्षायवरसमयः परितः स्र
ज्याध्येयाव ॥ क्रमप्राप्तं तैजससरसिमिमुखादेवदेव्यावाह ॥ ॥ तवस्वाधिष्ठाने हुतवहम
धिष्ठायनिरतं तमीडे संवर्त्तं जननिमहतीं तां च समयां ॥ पदालोके लोकान्दहति महति
क्रोधकलिते दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति ॥ ३९ ॥ तवस्वाधिष्ठानेनानि
स्वदशदलपद्ममध्ये हुतवहमधिष्ठायवह्निरूपमात्रिस्पनिरतं नितरां प्रीतिमंतं तं ई
डे स्तवे संवर्तं संवर्तेश्वरं हे जननि महतीं महाप्रकाशज्वालाविलासेन विश्वसंहारस
मर्थे संवर्त्तेश्वरावियांतां समयां समयाभिधानां च ईडे यदालोके क्रूरे क्रोधकलि
तो पसनु च तेसनि दृष्टिः नेत्रकरिशरारात्कारस्फुलिंगोद्गारिवह्निकराले लोकान्दद
हति महति कल्पावसानसमुज्जृंभितशक्तिपरंतं ज्ञेयस्य संवर्त्तेश्वरस्य आलोके इ
 ति तं वा संजिहीर्षा शक्तिवशं वदसंवर्त्तेश्वरस्य महति क्रोधे संप्रेक्षणे च तीयनयनोन्मेषे

एसंवर्त्तानलः सर्वान्लोकान्दहति । या पुनर्दयार्द्रा सती शिशिरमुपचारं रचयतीति स्वच्छा
शक्त्या तु यासं वलितरजोगुणोद्भोधेन विध्वंसं तज्जं करोति । यथा प्रवैकल्यपतीतिनाव । सं
वर्त्तेश्वरसमयादेवं वा इति देवदेव्यौ तन्मध्ये हृज्जौ ध्येयौ वा ॥ द्विषष्ठितैजसरसमयः स्त्रवौ
का: परितः स्रज्याध्येयाव ॥ क्रमप्राप्तास्परसिमिदं वदेव्यावाह ॥ ॥ तडित्वंतं शक्त्या तिमिरप
रिपंथिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषं ॥ तव श्यामं मेघं कमपि मणि
पूरैकशरणं निषेवे वर्षंतं हरमिहिरतप्तं त्रिभुवनं ॥ ४० ॥ तिमिरस्य परितो वृत्तिः तिमिरं
सर्वतः संवेष्ट्य वर्त्तिनि रिपुर्यं तस्य स्फुरणं यस्याः साएतादृश्या शक्त्या तडित्वंतं स्फुरन्ना
नारत्नाभरणैः परिणद्धेंद्रधनुषं । शिवस्य शक्त्याः हीकारपुष्परागपद्मरागादिविविधां
न रत्नैः मूर्त्ताञ्चितेंद्रचापमित्यर्थः ॥ कमपि मणिपूरैकशरणं षड्रत्नमणिपूरपद्मचक्र
वंतं मेघं मेघेश्वरं सौदामिन्यंतवयारात्क्यास हितं निषेवे । मेघेश्वरसौदामिनी अंबा च
मध्ये ध्येयो हृज्जौ वा ॥ पुरतो द्विपंचाशदाप्पमरीचयः ध्येयाः स्रज्याव ॥ क्रमप्राप्तो पार्थि

सौं.ल.

वरशिमुखदेवदेवाबोह॥ ॥तवाधारेमूलेसहसमयपालास्यपरयानवात्मानंमन्ये
नवरसमहाताण्डवनटं॥उभा भ्यामेताभ्यामुदयविधिमुद्दिश्यदयासनाथाभ्यांज
ज्ञेजनकजननीमज्जगदिदं॥४१॥तवमूलाधारेचक्रेइलपभमध्येलास्यपरयालास्य
न:टं रसरसिकयाशृंगाराधारदेवतास्वसमयासहसमयाख्ययाशक्त्यासहनवात्मानं
नवरसमहाताण्डवनटंशृंगारादिनवरससमुपहितनिरतिशयमहोत्साहताण्डवन
टं।उभाभ्यामेताभ्यांलास्यैश्वर्यादिनटनवात्मरूपाभ्यांउदयविधिमुद्दिश्यमहा
संसारानंतरंजगदुत्पत्तिमनुसंधायदययानष्टस्यविश्वस्यकल्पादिकारणेन्द्रतया
सनाथाभ्यांसखात्मिकाभ्यामिदंजगत्जनकजननीमज्जज्ञेउदपद्यते।मिथुनात्मीलि
ताभ्यांहेतुनायथाद्वयंजगदुत्पन्नंविलोक्यसंतोषेणजगद्व्याप्यताण्डवसमुत्सुकाभ्यां
देवदेवीभ्यांजगदिदंमातापितृमज्जातमित्यर्थः।यथामातापितरौपुत्रेजातेसंतोषा
तिशयेननृत्यतःतथैतिभावः।तथाचमहिम्नस्तोत्रे।जगद्रक्षायैत्वंनटसिननुवामेव ४०
भुतेति।अत्रपद्येनवात्मविद्यायाउद्धारःसूचितः।नवस्यषष्ठीस्तोत्रेभगवताशंकरा

चार्येणास्तगुरुमुखादवगंतव्यः।इतिचक्रषट्कं।यथाज्ञानंगुरुमुखादधिगतंकिंचिन्निरूपि
तं।इतोधिकंमहाशयैरधिगंतव्यं।इतिशक्तितंत्रयोःनवतंत्रयोःस्वरूपंनिरूप्यतेषामप्यु
परितवपादांबुजयुगमितिपूर्वमुक्तंभगवत्याश्चरणांबुजस्यालोकंप्रतिपादयितुमु
क्तलादिचरणंतत्रवयवस्तुतिंकर्तुमारभते॥ ॥गतैर्माणिक्यत्वंगगनमणिभिः
सांद्रघटितंकिरीटंतेहैमंहिमगिरिसुतेकीर्तयतियः॥सनीडेयच्छायाच्छुरणशबलं
चंद्रशकलंधनुःशौनासीरंकिमितिननिबध्नातिधिषणां॥४२॥हेहिमगिरिसुतेतव
हैमंकिरीटंमाणिक्यत्वंगतैर्गगनमणिभिर्बालार्कैःसांद्रघटितंसांद्रंनिविडंयथास्या
देवंघटितंसंकीर्तयतियःसच्छायाच्छुरणेनयत्कांतिव्याप्त्याशबलंविचित्रंसौनासीरं
धनुःकिमिदमितिधिषणांबुद्धिंभ्रांतिविधत्ते।उत्प्रेक्षितमाणिक्यादिनानारत्नखचि
तकिरीटकोसौसवलितंतंचंद्रशकलमवलोक्यइंद्रस्यचापमानंभ्राति
त्युत्पश्यतावतामहादेवस्तदृशीमतिंविधत्ते।अन्यस्यपतत्रमुखावलोकनेकाश
किरितिभावः।अथवानवहेमंकिरीटंउत्तरनरणंयःकीर्तयतिसःतदसाक्षात्कारंप्रा

ध्यतवानुचरःसन्मुकुरमालोक्य सौनासीरं धनुःकिमिदमिति बुद्धिं बध्नाति इति। एतावता
हे हैमकिरीटायन मइति किरीटमंत्रत्वेऽद्भुतः। किरीटमंत्रविशेषाग्रे रत्नखादवर्गेत ब्यः। एत
त्कीर्णे नेन वसादिकृत्कारोज्ज्वतीतेन्नापि ईदृशाधिष एतान्वती तिज्ञावः। अथवा ध्यानयो
गेन तव साक्षात्कारं प्राप्य किरीटमालोक्य एतादृशीं बुद्धिं मनुते बध्नते। किरीटमंत्रमाहा
त्म्यं एतावता प्रकाशितं अलंकारस्तोतति॥ ॥धुनोतु ध्वांतं नस्तुलितदलितेंदीवर
वनं घनस्निग्धं श्लक्ष्णं चिकुरनिकुरंबं तव शिवे॥ यदीयं सौरभ्यं सहजमुपलब्धुं सुम
नसो वसंत्यस्मिन्मन्ये बलमथनवाटीविटपिनां॥४३॥ हे शिवे तव चिकुरनिकुरंबं अ
लकसमूहः तुलितदलितेंदीवरवनं उपमितिविकचेंदीवरवनं अनेनोपमितं तव चि
कुरसदृशं तत्। न तु तत्सदृशमेतत्। यतः घनस्निग्धं। श्लक्ष्णं च। उपमेयचिकुरोत्कर्षहेत्वं
तरमाह। यदीयं सौरभ्यं सहजमुपलब्धुं प्राप्तुं बलमथनवाटीविटपिनां नंदनवनवर्ति
कल्पवृक्षाणां सुमनसः कुसुमानि अस्मिंस्तव कचनिकुरंबे वसंतीति म ४१
न्ये। तेषां सं र्गेण तवालकानां नोत्कर्षः किंतु वालकसंप र्केण तेषामुत्कर्षः॥
त

सुरासुरसीमंतिनीविहितपूजा तवालकाश्रयणेऽपमेव हेतुरिति हेतुरलंकारः। एतादृशं
नः ध्वांतं अज्ञानं धुनोतु दूरीकरोतु स्वयं श्यामासती मम ध्वांतं नाशयतीति महदाश्चर्यं। सीमं
तस्तोति॥ ॥वहंती सिंदूरं प्रबलकबरीभारतिमिरद्विषां वृंदैर्बंदीकृतमिव नवीनार्ककि
रणं॥ तनोतु क्षेमं नस्तव वदनसौंदर्यलहरीपरीवाहस्रोतःसरणिरिव सीमंतसरणिः॥
॥४४॥ तव सीमंतसरणिः सिंदूरं वहंती। कीदृशं सिंदूरं प्रबलकबरीभारस्तस्य तिमि
रोपमाः द्विषस्तासां वृंदैर्बंदीकृतमिव नवीनार्ककिरणं। कीदृशी सा सीमंतसरणिः। तव वद
नसौंदर्यलहरी सौंदर्यातिरेकपरंपरा तस्याः परीवाहः उल्लासः उत्तरोत्तराभिवर्द्धनं
तदेव यत्स्रोतः सरणिः सौंदर्यमहानद्याः अनवरतानुवर्त्तमानधाराकारपरं पुरो
न्मेषवती प्रवाहसरणिरित्यर्थः। नः क्षेमं तनोतु। लब्धस्य परिपालनं क्षेमः पूर्वजन्म
कृतैरपि तव चरणांबुजभक्तिर्लब्धा तां परिपालयतु। अत्रोपमाद्वयेन भगवत्याः
सीमंतसौंदर्यातिरेकः प्रतिपादितः तेन जगदंबिकाविषयभक्तिरुत्करणेनावधः

परिपुष्यते॥सामान्यतो वदनं स्तौति॥ ॥अरालैः स्वाभाव्यादलिकलभसश्रीभिरल
कैः परीतं ते वक्त्रं परिहसति पंकेरुहरुचिं॥दरस्मेरे यस्मिन्दशनरुचिकिंजल्करुचि
रे सुगंधौ माद्यंति स्मरमथनचक्षुर्मधुलिहः॥४५॥अरालैः कुटिलैः स्वाभावा
त्सहजकुटिलैरित्यर्थः॥अलिकलभसश्रीभिः अलिकलभसंनीतिश्च अलिकलभसाः
एतादृशाः श्रियो येषां तैः तादृशैरलकैः परीतं व्याप्तं तव वक्त्रं परिहसति पंकेरुहरुचिं॥दर
स्मेरे ईषद्धास्योन्मेषे दशनरुचिकिंजल्करुचिरे दंतपंक्तिकांतिकेसरमनोहरे यस्मि
न्वदनकमले सुगंधौ माद्यंति स्मरमथनचक्षुर्मधुलिहः॥मदनारिनेत्रमधुक
राः॥पक्ष्मलाव कुटिलै वेष्टितं दंतपंक्तिरूपकेसरमनोहरं॥स्मरारिनेत्रमधुक
रोन्मादकां तत्तेवक्त्रं लायमानकेसरं बद्ध हसति॥पंकोद्भवं मदनचापं मोघ
कृतमधुरतोषकरी पंकेरुहरुचिं हसतीति किमाश्चर्यं॥किं बहुना तावद्वदनप ४२
रिवाराः अलकाः पंकेरुहरतमलिकुलं हसंति॥वक्त्रं च पंकेरुहं हसतीत्यन्ये

स्तबकीकृतापप्रकृचिरहो वदनमहिमा परोत्कर्षासहनकुटिलैः संसर्गज इतिना
वः लोके प्रियः कुटिलचेष्टितः स ईषद्धंतविकासेन मंदस्मितेन रवस्माद्धीनं हसतिप
रीतं तद्वक्त्रं न वहसति पंकेरुहरुचिमिति केचिन्नाहुः॥तदनुसारेणायमर्थो योजनी
यः सर्वोपि नालंस्तौति॥ ॥ललाटं लावण्यद्युतिविमलमाभाति तव यद्द्वितीयं
तन्मन्ये मुकुटघटितं चंद्रशकलं॥विपर्यासन्यासादुभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राकाहिमकरः॥४६॥तव ललाटं लावण्यघनकां
त्या विमलं यदाभाति तद्द्वितीयं मुकुटशशिखंडस्य शकलमिति मन्ये॥किरीटको
टिस्थस्यार्द्धचंद्रस्य परमर्द्धमिति स्पर्धः॥तत्र हेतुमाह॥विपर्यासन्यासो व्यत्यासतो
न्यासाद्धेतोः विपर्यासेपि हेतुमाह॥यतः उभयं प्रकृतसंधानमवितः पततो व्यस्त घ२
विन्यासमीकृत्य संधाने कृते सुधालेपस्यूतिः सुधासांद्रविभ्रमः राकाहिम
करः पूर्णचंद्रः परिणमति॥परिणमति चंद्रबिंबमध्ये कस्तूर्या रेखा विधा

निर्जित्य अर्जुनमुत्कृष्टराशिखंडं अर्जुनेन वरं न आटं विहितवान्। कश्चिदनादि पुरुषः।
अतएव अर्जुनेन लक्षाराघवेंद्ररेखा इह दृश्यत इति भावः। उत्प्रेक्षोपमा ह्यलं
कारयोर्गं संकरो न यथा सत्तं न वं ज्ञेयः॥ कवीन्नोति॥ ॥ क्वचीनुग्ने किंचिद्भुवन
नयनैगव्यसनिनी त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे॥ धनुर्मन्ये स
व्येतरकरगृहीतं रतिपतेः प्रकोष्ठे मुष्टौ च स्थगयति निगूढांतरमुमे॥४७॥
हे भुवनत्रयभंगव्यसनिनि निजगाढप्रत्नेऽजनशीलेन वक्र कवीरु किंचिदानुग्नेऽषि
त्कुटिले मधुकररुचिभ्यां नेत्राभ्यां धृतगुणं तं गाव मान नेत्रभावो केधनुःपो
षं मोवा मधुकरमयीति प्रोक्तं। धनुर्मन्ये पुष्पचापं ज्ञानेन उत्प्रेक्षालंकारः।
रतिपतेः सव्येतरकरगृहीतं प्रकोष्ठे मुष्टौ च स्थगयति। आच्छादयति मु
ष्टौ धनुर्मध्ये प्रकोष्ठे ज्यामध्ये च स्थगयति॥ निगूढांतरं यथा भवति तथा करो ४३
ति। प्रकोष्ठमुष्टिभ्यां वधानात् धनुर्मध्यं ज्यामध्यं च न दृश्यत इति भावः। अह

नवे विच्छ्रदर्शने अयं हेतुः वंचनत्वकरवहेतु। धनुः तदेव निकुंजे तेः पोषको हेतुः संकरः। अहः स्रु
तेमध्यं नवत्वादि दिक्षु कादराभिः सोकेन वंदतीति॥ ॥ अहः स्रुतेमयथत वनयनमर्कात्म
कतया त्रियामां वामं ते सृजति रजनीनायकमपुं॥ तृतीया ते दृष्टिस्ते दरदलितहेमांबुज
रुचिः समाधत्ते संध्यां दिवसनिशयोरंतरचरीं॥४८॥ तव सव्यं दक्षिणं नयनं अहः स्रु
तेः सृजति अर्कात्मकतया तत्तु नयनमेव सव्यरूपेण दिवसं हादित्यर्थः। त्रियामां रजनी
वामं नेत्रं रजनीनायकमपुं चंद्रात्मकतया इत्यर्थः। तृतीया दृष्टिस्ते नासगते नियाव
तु। दरदलितहेमांबुजरुचिः ईषद्विकसितस्वर्णकमलसकांतिः दिवसनिशयोरंतरचरीं
संध्यां समाधत्ते। वह्निरूपनयनेन गवत्यानेत्रत्रयस्य सूर्यादि वह्निरूपतास्वचनावो
क्तिः। तेन शिवेन सह अभेदो ध्वन्यते॥ ॥ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलय
ैः कृपाधारापारा किमपि मधुराभोगवतिका॥ अवंती दृष्टिस्ते बहुनगरविस्ता
र विजया ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते॥४९॥ विशाला विशालत्वं प्रकाक

ल्याणानि सर्वकल्याणानुमोदिनी स्फुटरुचिः सदा विकसिता अयोध्या कुवलयैः इं
दीवरैर्या कुमराकमाता नित्वं द्यासहयो कुमागतानि पराजितानि न कयाराजाव
वान्मीलितसुखानि जायतेन दिवेतिभावः। अयमेवार्थः कैतिकामधेनोदार्शितो
स्मान्निः प्रकारांतरेणानेनाह वाष्पसुखमामुखमंबुजं नेदा उशिवे पुनरशाक्तिन
देकसारं आलंब्यपाथ्यासिसस्त्वमेणालंदंउन्दनंतपः परमहंसयुतं तनोति इ
ति हि पाधरा अपारा अनवरततया परंपरया परिझराणां किमपि मधुरा अवो
ज्ञनसगोचरा मनोहरगुणा भोगवतिकाशिवविषयकपरमप्रेमाद्वैलोक
कौतुकावंती न कजनानि निबद्धनगरविस्तारविजया विशाला नगरी कल्या
णी कल्याणनामपत्तनं अयोध्या रामपुरी। भोगवती अवंती। निबद्धनगराणां
विस्तारं विजयते। इति बद्धनगरविस्तारविजयास्तीति नामव्यवहरणयोग्या वि
जयते सर्वोत्कर्षेण वर्त्तते। विशालां जित्वा वि[illegible]रातानाम व्यवहारयोग्यतीक

ल्याणानाम नगराणि जित्वा तेषां यानि यानि नामानि तैस्तैर्नामभिर्व्यवहियमाणा
विजयते। येये गुणाः पूर्वोक्तास्तेते विशालादिनगरेष्वनसंतीति भावः। किं च विशाला
दिनगराणि कुवलयैः अं धीपादिसमञ्चकैः यो ध्यान्याक्रांतानि निगृहीतानि
नवदृष्टि कुवलैरयोध्या आक्रांता क्रांता। यतः जगत्प्रकाशकसूर्येंदुव क्तिरूपेति धुनिः
कुवलयैरितिशाद्बुछलेन इंदीवराणिश्च वलया यस्य गृह्यंते॥ ॥कवीनां सदनेस
बकमकरंद कल्परितं कटाक्षव्याक्षेपचमरकलभौ कर्णयुगलं॥ अमुं चंतो हव्या
न कनवरसास्वादनरता वस्त्रपासं प कंदलिकनयनं किंचिद्रूपं॥५॥ काविवाल्मी
किव्यासप्रभृतीनां सदनं सत्कवकगद्यपद्यादिरचनाविशेषस्तेषां मकरंदाः शृंगारा
दिरसनावाः तेरेषु भरितं पूर्णं कटाक्षव्याक्षेपचमरकलभौ कदाक्षेच्छलच्चम
रशिशु कर्णयुगलं अमुंचंतो सदा कर्णौ पानसे विनोदृष्ट्वा अस्त्रपासं पकाल्पिरो
त्कर्षसिंहत्वादलिकनयनं किंचिद्रूपं। अत्ररूपकहेतु लंकारा भ्यांसत्वाना विकौ

भा॰ जनयनं

प्फुल्लिमा अपह्नूयत इति। अपह्नुतिरलंकारोऽयं ग्या॥ ॥शिवे शृंगारार्द्रा तदि
तरजने कुत्सनपरा सरोषा गंगायां गिरिशनयने विस्मयवती॥ हराहिभ्यो भीता स
रसिरुहसौभाग्यजयिनी सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा॥ ५१॥ शिव
विषये कनिरतिशयप्रेमपूर्णत्वादितरमुखे शिवादितरब्रह्मादयो मुख्यं प्रधानं य
स्य तस्मिन्त्समस्तेऽपि लोके विनाशित्वेन कुत्सनाजनितबीभत्सरसवती तथा च ब्र
ह्मादीनां विनाशित्वं विरिंचिः पंचत्वमिति पद्ये प्रकाशितं। अथवा शिवेतराणां मु
खत्वगादिधातुनिर्मितत्वेन विचिकित्सादिबोधितबीभत्सरसा। मुख इति जाता
वेकवचनं। अथवा शिवेतरमुखे कदर्यताविभावितबीभत्सरसोन्मेषा सरोषा
गंगायां सापत्न्यभावाकलितक्रोधाद् अतिरौद्ररसा। गिरिशनयने एकवच
नात्तृतीयनयने मसाक्षात्कारेण लोकविस्मयोद्भासितोऽद्भुतरसा। हराहिभ्यो भी
ता कंकणादिरूपेण वृतसहस्रफणादिनागानालोकि कथमयं कंडे वि

पंथवेतगोत्रेषु विषधरान तिङ्करानिति भयाविभावितभयानकरसा। सरसिरुहसौभाग्य
जयिनी पद्मगतसौभाग्यजयिनी लतया प्रोत्साहोद्दीपितवीररसा। सखीषु स्मेरा। सखि
कथय कीदृगनुरागस्तव शिवस्य त्वयि कीदृगिति सखीवचनाकर्णनोपनीतमंदस्मितो
दितहास्यरसा। मयि जननि दृष्टिः सकरुणा अयं मदङ्कः सन्दुःखी न विष्यतीति सानु
ग्रहशोकोन्मीलितकरुणरसा। इति शृंगाराद्यष्टरसाजुष्टा। शांतस्तु नवमो रसो नेह
प्रतिपादितः शिवविषयकशृंगाररसप्राधान्यादनुक्तः। तथा च दशरूपके। नयत्र दुः
खं न सुखं न चिंता न द्वेषरागौ न च काचिदिच्छा। रसः प्रशांतः कथितो मुनींद्रैः सर्वेषु
भावेषु समप्रधान इति। विशेषतः शृंगारविरोधादिति। ननु यत्र भिन्नदृष्टिगतार
सास्तर्हि तेन च दृष्टिभेदेन वर्णनीयाः यथा। एकं ध्याननिमीलनान्मुकुलितं च क्षु
ल्लितं पुनः पार्वत्या वदनांबुजस्तनतटे शृंगारभारालसं। अन्यद्दूरविकृष्टचापम
दनक्रोधानलोद्दीपितं शंभोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु व इति। यथा वा
एकेनाक्ष्णा प्रविततरुषा वीक्षते व्योमसंस्थं भानोर्बिंबं सजललुलितेनापरेण

कांतं। अङ्गःच्छेदेदयितविरहाशंकिनीचक्रवाकीद्वौसंकीर्णौरचयतिरमौनर्तकीवप्र
गाढेति। तस्मादेकदृष्टिगतोरसानवर्णनीयाइति। सत्यं। यत्रसमप्राधान्यंरसानांत
त्रैवाधिकरणभेदः। यत्रपुनःसमप्राधान्यंनास्ति। एकस्यैवमुख्यता। अन्येषांतत्पोषक
त्वंतत्रनायंदोषः। प्रकृतेतुःशृंगाराद्वाइतिप्राधान्यप्रतिपादकेनतस्यैवमुख्यता। अतएव
वाईत्फळं। कदापितस्यदोषोनास्तीति। अन्येवानन्मादयस्तस्यपोषकास्तस्मादत्रनायं
दोषः। यथा। सक्रोधादशकंधरेसकरुणातस्यानुजेसस्मिताप्रोत्फालेषुवनौकसां
सऊत्रकायुद्धेसनिंदांबुधौ। साश्चर्याहनुमत्कृतेसवकिताब्रह्मान्वयाछेदनेसा
द्वेगादयितास्मृतौमुऊलितारामस्यदृष्टिःस्थितेति। सोद्वेगाअथचमुऊलिता
स्थिताइतिविशेषणत्रयमहिम्नादयितास्मरणानंतरंकोपिदृष्टेर्व्यापारोजातस्त म
तारव्यसात्विकभावोभूत। तेनविप्रलंभशृंगारस्यप्राधान्यं। अन्येक्रोधादयस्त
राहिताः। तथापिरौद्रबीभत्सौशृंगारविरोधिनौकथमत्रेतिनशंकनीयं। एकवि ४९
षयत्वेनायंदोषः। आश्रयभेदेतुनदोषः। प्रकृतेशृंगारविषयान्याजुगुप्सादि

विषयोन्यइतिनदोषः। तथाचदशरूपके। एकोनपंचाशदमी। नियुक्तानावानिबद्धाःपरि
पोषयंति। आत्तस्यमोहंमरणंजुगुप्सांतस्याश्रयादैनविरुद्धमिष्टमिति॥ ॥गलत्कर्णा
भ्यर्णगरुनद्वपद्माणिदधतीपुरंजेतुश्चित्तप्रशमरसविद्रावणफले॥ इमेनेत्रेगो
त्राधरपतिकुलोत्तंसकलिकेतवाकर्णाकृष्टस्मरशरविलासंकलयतः॥ ५२॥ हे हिम
वद्गिरीद्रकुलावतंसकलिकेतवकर्णाभरणकल्पद्रुमप्रसूननकोरके। शोभैतेतवनेत्रेकर्णा
तविश्रांतेगरुत्वइवपक्षाणिविपक्षाणिदधतीपुरवैरिशांतरसोच्चाटनफलेप्रशमर
सविद्रावण मेवफलंतेनदुःसाध्यमितियावत्कुरमितिश्लिष्टंपदंशात्यमपिगरहा
तेनप्रशमरसः। विद्राव्यतेनेनेतिव्युत्पत्तिस्तथाकर्णाकृष्टस्मरशरविलासंकल
यतःमदनशरलीलांधत्तः। अत्रान्यलीलामन्याधत्तेसाधर्म्यादितिनिदर्शनालंका
रणमदनारेरपिप्रशमरसंविद्रावयन्तीतिजगवत्याःअपांगमहिमापुष्टःस
नशिवविषयंशृंगाररसोलंकिंव्यनक्ति॥ ॥विभक्तेत्रेवर्णप्रव्यातिकेरितनीलांबु

जनयाविजानातित्वन्नेत्रत्रितयमिदमीशानदयिते॥ पुनः स्रष्टुं देवान् द्रुहिणहरिरुद्रानु
परतान् रजः सत्वं बिभ्रत्तम इति गुणानां त्रयमिदं॥ ५३॥ विलक्षैः त्रिवर्णैः त्रयाणां वर्णा
नां भावस्त्रैवर्ण्यं श्वेतरक्तकृष्णानामित्यर्थः। तस्य व्यतिकरः संपर्कः संसर्गस्तेन पुनर्नवता
दृशा नीलांबुजतया श्वेतरक्तनीलसंपृक्तनीलोत्पलभावेनेत्यर्थः। नीलांबुजरुचेति
पाठांतरं। हे ईशानवनिते त्वन्नेत्रत्रयमिदं विजानाति। उपरतान् प्रलयं गतान् द्रुहि
णहरिरुद्रान् पुनः पुनः स्रष्टुं रजः सत्वं तम इति गुणानां त्रयमिव दक्षिणनेत्रं रजो
गुणप्रधानं वामनेत्रं सत्वप्रधानं भालनेत्रं तमःप्रधानं तैः ब्रह्मविष्णुमहेश्वराणां उ
परतानां स्रष्टृत्वेन रक्तश्याममिति विलक्षत्रैवर्ण्यभावसंपृक्तनीलांबुजलोचनत्वेन
रक्तश्यामात्मकवर्णत्रयं बिभ्रदेषेति पिंडितोऽर्थः। क्वचिन्निसर्गे विलसन्तो निकमलेनएके
ब्रह्माणं स्रष्टवान् भगवतीनेत्रोत्पलैः ब्रह्मविष्णुमहेश्वरान् सृजति। लीलायति ५१
नेत्रमहिमालोकोत्तर इति ध्वनिः। विलक्षत्रै[illegible]गुणव्यतिकरेति नीलांबुजतये

श्रोतो नदः गंगा तपनतनया इति त्रयाणां तीर्थानां संभेदसमपनं नः
कस्मात् पवित्रीकर्तुं उपनयसि समीपं न तं करोषि

तिवा[illegible] पाठः॥ एवं पाठत्रये पद्धतिर्नितंत सद्भिर्व्याख्येयं॥ ॥पवित्रीकर्तुं नः पशुपतिपराधीन
हृदये दयामित्रैर्नेत्रैः अरुणधवलश्यामरुचिभिः॥ नदः शोणो गंगा तपनतनयेति त्रि
वमसुत्रयाणां तीर्थानामुपनयसि संभेदमनघं॥ ५४॥ हे पशुपतिपराधीनहृदये महा
देवपरतंत्रहृदये दयामित्रैः दयावशाद्बान्धवसौहार्दैः। अरुणधवलश्यामरुचिभिः
विलक्षत्रैगुण्यैः क्रमेणेत्यर्थः। [illegible] गंगा तपनसुता सरस्वतीनां संभेदो दृष्टः। यमुना
नो ननु शोणगंगायमुनानां तु पवित्रीकर्तुं एतादृशं तीर्थसंभेदमुपनयसि। अहो ते न
केवलं दयापरतंत्रता अस्माकमपि संभावयसीति भावः। अत एव न यथास्वात्मा विकर्त
मित्यगुणाध्यासितत्वे यद्यपि प्रत्येकं नेत्रयोरपि त्रैगुण्यमस्त्येव तथापि त्रैगुण्यतारतम्य
मिह प्रतिपाद्यं रजोगुणाधिक्यं दक्षिणनेत्रे सत्वगुणाधिक्यं वामनेत्रे तमोगुणाधि
क्यं भालनेत्रे इति॥ ॥तवापर्णे कर्णे जपनयनपैशुन्यचकिता निलीयंते तोये
निपतमनिमिषाः शफरिकाः॥ इयं च श्रीबुद्धिच्छदपुटकपाटं कुवलयं जहाति प्रत्यूषे

निशि च विघटय्य प्रविशति ॥५५॥ हे अपर्णे तव कर्णेजपनयनपैशुन्यचकिता कर्णेज-
पाः दुर्जनाः सर्वदा कर्णान्तं तु विनयनयोः पैशुन्यचकिताः स्वस्तादृश्यमस्मासु विलोक्य
भगवत्याः कर्णे सास्त्र्यं किं वादो ऽन्यं कथयत इति भीताः शफरिकाः अनिमिषाः स-
त्यः निमग्नं तोयं निश्चितं तोये निलीयन्ते इयं च कुवलयश्रीः बद्धच्छदपुटकपाटं कुव-
लयं प्रत्यूषे जहाति निशि च विघटय्य उद्घाट्य प्रविशति कुवलयश्रीरपि कर्णेजप-
नयनपैशुन्य[illegible] भीता दिवा अत्र चिन्तितायाश्छिता बद्धच्छदपुटकपाटमुद्घा-
ट्य रात्रौ तत्र विशति अत्र नयनयोः कर्णान्तविश्रान्तत्वमुक्तं शफरिकाणां तो-
ये निवासः प्रसिद्धः कुवलयश्रियश्च दिवा निमीलनं रात्रौ निवास इति प्रसिद्धं तद-
पह्नुत्य निमिषितिः कर्णेजपत्वं भीत्या निलीनत्वं च साध्यत इत्यपह्नुतिः ॥ ॥नि-
मेषोन्मेषाभ्यां प्रलयमुदयं याति जगती तवेत्याहुः सन्तो धरणिधरराजन्यतन- ५८
ये ॥ त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शङ्के परिहृतनिमेषास्तव दृ-

शः ॥५६॥ हे धरणिधरराजन्यतनये तव निमेषोन्मेषाभ्यां प्रलयं च पुनः उदयं याति जगती
पृथ्वी जगतीत्युपलक्षणं सकलं जगत् जगतीशब्दो जगद्वाचक इति अभियुक्तवचनं इ-
ति सन्तः परमार्थदर्शनेन विच्छिन्नाः सर्वे पठन्तः त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं [illegible] परिहृतनिमेषास्तव दृशः उन्मीलनाज्जातं जगत् त्वदान्निमेषु निमीलने जाते
उत्पन्नमेव नश्यतु इति हेतोः अनिमिषनयनत्वमिति भावः निरतिशयानन्दमय एव ब्रह्म
विना तत्त्वचिन्तकैः देवैनाशरीरोपाधिमवलम्बमानायाः अनिमिषनयनत्वं स्वाभा-
विकं तदन्यथा प्रस्तूयत इत्यपह्नुतिः ॥ ॥दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ॥ अनेनायं धन्यो भवति न च ते हानिरिय-
ता वने वा हर्म्ये वा सममकरनिपातो हिमकरः ॥५७॥ हे शिवे दीर्घतया दृशा ईषद्विकसित-
नीलोत्पलरुचा दवीयांसं दूरस्थं दीनं संसारक्लेशपर्याकुलं अनन्यगतिकं स्नपय
आप्लावय कृपया परिक्षिप्तदृष्टिपरंपरया मां परया अनेन मत्त्वत्कृपणे जनः धन्यो
भवति न च ते हानिरियता एतावन्मात्रेण न च कापि हानिः अपिशब्दोऽत्र दर्शनवि-

सौं·ल·

शेषकद्योतकः।यथास्तंनादिकंपश्यतितथानकिंचिद्रूपयादर्शनेनपामात्रवैशिष्ट्य
मतिजन्योयंजनःतवस्नीलामात्रेणगतइवतिनकश्चित्रुपासःयतःवनेवाहर्म्येवासौधे
वाहिमकरःस्मकरनिपातःयथाचंद्रःअहमोषधीशःअधिकान्तकरान्तिरामिहमर्त्ये तेनवचने
स्वल्पानितिपक्षपातवान्नभवति।तथात्वमपिदूरस्थेसमीपस्थेचदर्शनं[illegible]पक्षपात
वतीनभवसिविशेषतोऽहंदीनःमद्विषयेपक्षपातोयुचितइतिभावः।अत्रप्रतिपादि
तार्थस्यदृढीकरणायार्थान्तरोपन्यासादर्थान्तरन्यासोऽलंकारः॥ ॥अरालंतेपालीयु
गलमगराजन्यतनयेनकेषामाधत्तेकुसुमशरकोदंडकुतुकं।तिरश्चीनोयत्रश्रव
णपथमुल्लंघ्यविलसन्नपांगव्यासंगोदधतिशरसंधानधिषणां॥५६॥हेअगराज
न्यतनये।अरालंकुटिलंतेपालीयुगलंकर्णयुगलंनकेषामाधत्तेकुसुमशरकोदं
डकुतुकंअपितुसर्वेषामाधत्ते।तिरश्चीनःतिर्यगाकृष्टःश्रवणपथमुल्लंघ्यविलस
दपांगव्यासंगःकटाक्षसंसर्गःशरसंधानधिषणांबुद्धिंदिशति।व्यक्तीकरोतीत्य ५६
र्थः।आकर्णाकृष्टशरशोभितमदनधनुःकौतुकंकस्यनकरोतिनकेषामाधत्तइत्य इति

तिरेकेणपर्यवसितानिदर्शनादन्य[illegible]कुतुकमन्योधत्ते।अरालस्यपक्षाक्षम्योत्।अपां
गव्यासंगःशरसंधानधिषणांदिशतीतितिरश्चीनःश्रवणपथमुल्लंघ्यविलसन्निति
त्रिविशेषणमहिम्नास्तमासोक्तिरात्रिप्रापमावा।अत्रस्मरारेधत्तेकुसुमशर
कोदंडकुतुकमितियुक्तःपाठः।सर्वेषामिसनोवित्यात्।क्रमप्राप्तंश्रवणान्तरालं
स्तौति॥ ॥स्फुरद्गंडाभोगप्रतिफलितताटंकयुगलंचतुश्चक्रंमन्येतवमुखमिदं
मान्मथरथं॥यमारुह्यद्रुह्यत्यवनिरथमर्केंदुचरणंमहावीरोमारःप्रथमपतये
सज्जितवते॥५७॥स्फुरन्नानारत्न[illegible]दीपितजालेनप्रकाशमानंहगंडाभोग
योःकपोलपरिणाहयोःप्रतिफलितताटंकयुगलं।अथवास्फुरतौनिरूपमनेर्म
ल्येनदीप्यमानयोर्गंडाभोगयोःकपोलपरिणाहयोःप्रतिफलितताटंकयुगलं
चतुश्चक्रंतवमुखमिदंमान्मथरथंमन्ये।यमारुह्ययमाश्रित्यअवनिरथंपृथ्वी
रथंअर्केंदुचरणंसूर्यचंद्रचक्रंआरुह्यास्थित्वपरंशत्रुंत्रिपुरगतदैत्यसंबंजित

म१ वतेमथपतपेडुत्यतिआरूढेयस्त्रूनयचर्मं बंधः॥महावीरः अत्र नवन्मुखलक्षण
रथाश्रयणेप्राप्तामोघविक्रमः मारः प्रमथपतेर्निः रथः चक्रेसूर्यचंद्ररूपंद्वि
चक्रेः नवमुखरथस्तुस्वचक्रेः।अथचंद्रसूर्यवक्षिरूपनयनत्रयाक्षिप्तितः समाप्ति
त्वप्रमथपतिंजेष्यतीतिकिमाश्चर्यमितिध्वनिः॥ अत्रयमात्रित्येतियुक्तेः पाठः
।मदनस्यजगदंबिकायाः मुखारोहणमायातनानुवितमितियदुक्तिंतज्ज्ञाद्रि
ग्राह्यं।प्रज्ञतमुखस्वरूपमपह्नुत्यमन्मथरथत्वारोपादपह्नुतिः।तारंकयुगलं
प्रत्यपश्रवणयुगलप्राख्यापनद्वाराकुंडलगणंस्तौति॥ ॥सरस्वत्याः सू
क्तीरमृतलहरीकौशलहरीः पिबंत्याः शर्वाणिश्रवणचुलुकाभ्यामविरलं॥च
मत्कारश्लाघाचलितशिरसः कुंडलगणोझणत्कारैस्तारैः प्रतिवचनमाचष्टइ
वते॥६०॥सरस्वत्याः सूक्तीः गद्यपद्यगीतादिरूपाः।अमृतपरंपरानिधानरू ५०
पाः श्रवणचुलुकाभ्यामविरतंअनवरतंपिबंत्यास्तवचमत्कारश्लाघाचलि

तशिरसः स्वक्तिश्रवणमुदितचमत्कारेणयासाधुवादोऽस्मुकंत[illegible]याकंपितमौलेः कुंड
लगणःप्रतिवचनमाचष्टइवतवपक्षेसाधुसाध्वितिकथयतीव।अथवाचमत्का
रस्ययाश्लाघासाधूक्तिः तयाकंपितशिरसः श्रवणकुंडलगणः तारैः उच्चैः झणत्का
रैः प्रतिवचनमनुमोदनरूपंआचष्टइवनकेवलंतंश्लाघसेकिंतुअचेतनः कुंड
लगणोप्यनुमोदतइतिध्वनिः श्रवणयोः चुलुकत्वख्यापनाद्रूपकंतत्तुअमृता
स्वादरूपाकर्णनेकारणंतच्चलीयाकारणंसाचप्रतिवचनदानेकारणंप्रतिव
चनंचापेमायान्स्मतइतिकारणमाला॥नासांस्तौति॥ ॥असौनासावंश
स्तुहिनगिरिवंशध्वजपटित्वदीयोनेदीयः फलतुफलमस्माकमुचितं॥वहन्नं
तर्मुक्ताःशिशिरतरनिश्वासगलिताः समृद्ध्यायस्तासांबहिरपिचमुक्तामणि
धरः॥६१॥हेतुहिनगिरिवंशध्वजपटि।वंशशब्दः श्लिष्टः।हिमवद्वंशध्वजप
टीध्वजरूपताकेत्यर्थः।असौनासावंशः त्वदीयः अस्माकंनेदीयः फलानिकटग

तंफलमुचितंफलमेतवचरणनखिभावसदृशंदातुमुद्यत्कोनवेत्तु।वहन्नेनमु
क्ताःअंतःमौक्तिकानिदधानाःशिशिरतरनिःश्वासघटिताःशीतलतरनिश्वासप्रे
रिताःसमध्यायस्तासांबहुत्वेनबहिरपिचमुक्तामणिधरः।अतःसमुद्रानांमु
क्तानांमध्यतःउत्सित्तमेकंमुक्ताफलंबहिर्निर्गतंनिश्वासनिरुद्धनासाग्रावलं
बितिष्ठतीतिभावः।अत्रस्वभावसिद्धतोनासाभरणमुक्ताफलमपहृत्यान्यथा
सिद्धत्वकल्पनादपह्नुतिः।कार्यैणावस्थितमुक्ताफलेनकारणभूतानांमुक्ता
फलानामंतःसमुद्रस्थितिरनुमापितइतिअनुमानालंकारः।दंतछदंस्तौति॥ ॥प्र
त्यारक्तायास्तवसुदतिदंतच्छदरुचःप्रवक्ष्येसादृश्यंजनयतुफलंविद्रुम
लता।।क्वबिंबंत्वद्बिंबप्रतिफलनलाभाद्रुणितंतुलामध्यारोढुंकथमिवनल
ज्जेतकलया॥६२॥हेसुदतिप्रत्यारक्तायाःस्वभावारुण्यायाःतवदंतच्छदरु
चःअधरकांतिसादृश्यंप्रवक्ष्येविद्रुमलतातर्हिफलंजनयतुउत्पादयतुतत ५२

र्हिबिंबंसादृश्यमुच्यतामितिचेत्तन।क्वबिंबंत्वद्बिंबप्रतिफलनलाभाद्रुणितंत्व
द्बिंबःस्वरूपंबिंबःतस्यप्रतिफलनंतस्यलाभाद्रुणितंतवनयनीन्तत्स्वरूपंबिंबकां
तिंप्रतिबिंबजातपाकेनारुणितमित्यर्थः।कलयापितुलांसमतामध्यारोढुंकथ
मिवनलज्जेतत्वद्बिंबप्रतिफलनलाभादितिपाठांतरं।तवकांतिप्रतिसारप्रतिबिं
बवशादित्यर्थः।जगद्गत्याःकांतेर्जगत्प्रसारितत्वाद्बिंबेऽपिप्रतिबिंबःकांतेरित्य
र्थः।अत्रविद्रुमलतायांचित्रितफलंजनयतुइत्यन्वयमुखेनकालत्रयेपिविद्रुमल
ताफलंनजनयतिनापिदंतच्छदस्याहंसादृश्यंवक्ष्येइतिव्यतिरेकः।बिंबंचतुलाम
ध्यारोढुंकथमिवनलज्जेत अपितुलज्जेतैवेतिव्यतिरेकमुखेनान्वयविश्रांतिः।
तस्माद्दंतच्छदस्यउपमानंनास्तितवदंतच्छदस्तवदंतच्छदेनैवसदृशः।यथा।ग
गनंगगनाकारंसागरःसागरोपमः।रामरावणयोर्युद्धंरामरावणयोरिवइति
वदुपमानांतरसंवेशान्नावादनन्वयालंकाराध्वनितः।स्मितंस्तौति॥ ॥स्मित

ज्योत्स्नाजालं तव वदनचंद्रस्य पिबतां चकोराणामासीदतिरसतया चंचुजडिमा ॥ अ
तस्ते शीतांशोरमृतलहरीमम्लरुचयः पिबंति स्वच्छंदं निशिनिशि भृशं कांजिकधिया
॥६३॥ तव वदनचंद्रस्य स्मितज्योत्स्नाजालं स्मितमेव ज्योत्स्ना न समूहं पिबतां चको
राणां अतिरसतया अत्यंतमधुरास्वादनतया चंचुजडिमा चंचुगतारोचकत्वमा
सीत् । अतस्ते शीतांशोरमृतलहरीं किरणामृतपरंपरां पिबंति । स्वच्छंदं निरर्गलं
यावत्पर्यंतं चंचुजडिम्नो विश्रांतिस्तावत् । कांजिकधिया अम्लरुचयः । पायसा
दिभोजनेनारोचके जाते अम्लभक्षणं विधाय पुनः पायसादि मधुरं भुंजते तथा ॥ अ
तः चंद्रकिरणस्योपमानस्य कांजिकत्वदोषारोपेण तुच्छत्वप्रतिपादनात् उपमे
यस्य वदतः तस्योत्कर्षप्रतिपादनाद् अतिशयोक्तिः । तव वदनचंद्रस्य स्मितज्योत्स्नाजा
लमिति रूपकद्वयेन तव वदनचंद्रः सर्वदा पूर्णः कलंकह्रासहीनः तादृशस्य स्मि ५२
तज्योत्स्नाजालं ईषद्धसितमेव ज्योत्स्नाजालं तत्पिबतां चकोराणां चंचुजडिमा जातः ।

तव स्मितचंद्रिकासुधा त्वं कलंकिनः ह्रासवृद्धिकदर्थितस्य राकायामेव पूर्णस्य कि
रणामृतलहरी कांजिकायत इति किमद्भुतमिति ध्वनिः । रसनां स्तौति ॥ ॥ अविश्रां
तं पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविरुचिः सरस्वत्या मूर्तिः परिणमति माणि
क्यवपुषा ॥६४॥ हे जननि । अनवरतं पत्युर्महादेवस्य गुणगणानुवादपौनः
पुण्येन जडा हर्षातिरेकपरवशा जपापुष्पच्छाया तव जिह्वा सा जयति । यदग्रे
आसीनायाः स्फटिकदृषन्निर्मलरुचिः सरस्वत्या मूर्तिः माणिक्यवदारक्ता जा
यत इत्यर्थः । वपुषा परिणमति । जिह्वाकांतिप्रतिपातनेन स्फटिकनिर्मलायाः
सरस्वत्या मूर्तिर्माणिक्यवदारक्ता जायत इत्यर्थमौपम्यं तेन उत्प्रेक्षार्थोपमा ॥
वदनं स्तौति ॥ ॥ रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चंडांश
त्रिपुरहरनिर्माल्यविमुखैः ॥ विरिंचींद्रोपेंद्रैः शशिशिशिरकर्पूरधवला विलिप्य

नेमातस्तववदनतांबूलशकलाः॥६५॥ रणेदैत्यान्जित्वाअपहृतशिरस्त्रैः अवता
रितशिरस्त्राणैःकवचिभिःसकाशात्कवचैः निवृत्तैः चंडांशुत्रिपुरहरनिर्माल्य
विमुखैःशिवनिर्माल्यंचंडांशस्येतिवांशः। अतोहेतोस्त्वद्विमुखैःविशाखेन्द्रोपेन्द्रैः शशि
शिशिरकर्पूरधवलास्तववदनतांबूलशकलाः क्षिप्ताःअंगेषु। रणगतैर्विरिंच्या
दिभिः श्रमपरिहारायतववदनकर्पूरमिश्रितताम्बूलशकलकवला क्षिप्ताः इति
स्तवावोक्तिः। कर्पूरसवलाइतिक्वचित्पाठः। चंडांश त्रिपुरहरनिर्माल्यमितित्यक्त्वा
तांबूलशकला क्षिप्ताः इतिश्लोकार्थः। तांबूलगुणवर्णनेनजगवत्यावदन
सौन्दर्यंस्तुतमेतावता॥ वदनंस्तौति॥ ॥विपंच्यागायंती विविधमवदानं
पशुपतेस्त्वयारब्धेवक्तुंस्खलितवचसासाधुवदने॥ तदीयैर्माधुर्यैरपलपित
तंत्रीकलरवांनिजांवीणांवाणीनिचुलयतिचोलेननिभृतं॥६६॥ विपंच्या ५३
तंत्र्यावीणयाविविधमवदानंसर्ववृत्तं पुरदहनादिकं विश्वंकर्मपशुपतेर्गा

यंती पुररिपोरितियुक्तः पाठः। त्वयारब्धेवक्तुंस्खलितवचैईषच्चलकवचनेन। च
लितवचसेतिक्वचित्पाठः। साधुवचनेनतदीयैर्माधुर्यैःसाधुवादमाधुर्यैरपल
पिततंत्रीकलरवातिरस्कृततंत्रीमधुररवानिजांवीणांवाणीसरस्वतीनिचुलय
तिचोलेनपरिधापयति। एवंसाधुवादमाधुर्येणममविपंचीकलध्वनिरकिंचि
त्करइतिविलक्षयाचोलेनवीणामाच्छादयतीत्यर्थः। अत्रस्तवावोक्तिरलंका
रः। चिबुकंस्तौति॥ ॥कराग्रेणस्पृष्टं तुहिनगिरिणावत्सलतया गिरीशेनो
दस्तंमुहुरधरपानाकुलतया॥ करग्राह्यंशंभोर्मुखमुकुरवृंतंगिरिसुतेक
थंकारंब्रूमस्तवचिबुकमौपम्यरहितं॥६७॥ हिमाचलेनातिप्रीत्याउपलाल
नादिपुरःस्तेनस्पृष्टं। तथागिरीशेनउद्दस्तंउन्नमितंमुहुर्वारंवारं। अधर
पानाकुलतया अथचशंभोःकरग्राह्यंमुखमुकुरवृंतंमुखदर्पणदंडं। हे
गिरिसुतेतवचिबुकमौपम्यरहितं। कथंकारंब्रूमः केनप्रकारेणब्रूमः। त्व

ऽलंकारंत्वमेवजानासि।सअलंकारोनास्मद्गोचरस्तत्त्वचिबुकस्यनैवचिबुकंस
दृशमित्युपमानाभावादनन्वयालंकारः।अत्रमुकुरधरपानाऽऽलनयेतिपित्रोः
सुरतवर्णनवदनुचितंजगवनःशंकरावता रस्यपरशंकराचार्यस्यवचनमित्यनौ
चित्यपरिहारः।गिरीशेनोदस्तंनिजचरणाम्बुजाप्रणतिषु इतिवा।गिरीशेनोदस्तं
मुकुरवनतंमानसमयेइतिवायुक्तःपाठः।ग्रीवांस्तौति।। ।।नुजासेषान्नित्यं
पुरदमयितुःकंटकवतीनवग्रीवाधत्तेमुखकमलनालश्रियमियं।।स्वनःश्वेता
कालागुरुबहलजंबालमलिनामृणालीलालित्यंवहतियदहोहारलतिका।।
६५।।नुजासेषान्नित्यंपुरदमयितुःकंटकवतीरोमांचवतीनवग्रीवामुखक
मलनालश्रियमियंधत्ते।स्वनावश्वेता।कृष्णागुरुजंबालमलिनाकृष्णागु
रुरूपपंकमलिनामृणालीलालित्यंवहतियत्तायतःहारलतिका।अहोग्रीवामु ५४
खकमलनालश्रियंधत्ते।कंटकितसाम्यादितिनिदर्शनात्हारलतिकामृणा

लीलालित्यंधत्तेश्वेतगुणसाम्यात्कृष्णागुरु जंबालकृतमालिन्यसा
म्यत्वाच्चेतिनिदर्शनमेव।अहोइतिविस्मयः।अत्ररूपकनिदर्शनापन्हुतिहेतु
विस्मयानांसंकरः।कंठगतरेखात्रयंस्तौति।। ।।गलेरेखास्तिस्रोगतिगमकगी
तैकनिपुणेविवाहव्यानद्धत्रिगुणगुणसंख्याप्रतिभुवः।।विराजंते नानाविध
मधुररागाकरभुवांत्रयाणांग्रामाणांस्थितिनियमसीमानइवते।।६६।।हेग
तिगमकगीतैकनिपुणे।तवगलेतिस्रोरेखाःविवाहसमयेव्यानद्धत्रिगुणगुण
संख्याप्रतिभुवः।विवाहसमयेईश्वरेणाबद्धत्रिगुणीकृतमांगल्यसूत्रस्यसा
क्षिणः।विराजंते।नानाविधमधुररागाकरभुवांनानाप्रकारषड्जमध्यमादि
सप्तस्वरानुबंधमधुरमाधुर्यवसंतमालवगौडगुर्जररागादिगीतानामुत्पत्ति
स्थानरूपाणांत्रयाणां ग्रामाणांषड्जग्राममध्यमग्रामपंचमग्रामा
णांस्थितिनियमसीमानइवत्वमत्रतिष्ठत्वमत्रतिष्ठतिष्ठेतिस्थितिनियमप्र

ततः क्षतसीमानः स्फुरंतीत्यर्थः। अत्रोपमास्पष्टारूपकं च॥ ॥भुजौ स्तौति॥ ॥
मृणालीमृद्वीनां तव भुजलतानां चतसृणां चतुर्भिः सौंदर्यं सरसिजभवः स्तौति व ऊ२
दनैः॥ नखेभ्यः संत्रस्यन्प्रथमदमनादंधकरिपोश्चतुर्णां शीर्षाणां सममभयह
स्तार्पणधिया॥७०॥ सरसिजभवः ब्रह्मा मृणालीकोमलानां चतसृणां तव भुजल
तानां सौंदर्यं समं एकदैव चतुर्भिर्वदनैः स्तौति। चतुर्णां मुखानां यथासंख्यम
भयहस्तप्राप्तिबुध्या अंधकरिपोः नखेभ्यः संत्रस्यन्प्रथमदमनाद्धेतोः एकं मु
खं पुररिपुणा ममच्छिन्नं अवशिष्टानि चत्वार्यपि छेदयिष्यतीति भयेन सममेयु
गपद् भयप्रदानार्पणधिया चतुर्भिर्हस्तकमलैरभयं मह्यं देहीति वरप्रार्थनबु
ध्येत्यर्थः। एतावता तवाभयदानेनांधकरिपोरपि क्रोधो ममातिक्रमणेन अरा
क्षितस्तस्मात्तवैव प्रसादो मुख्य इति भावः। अत्र चतुर्भिर्वदनैश्चतसृणां भुजल ५५
तानां सौंदर्यं पुष्णातीति परिसंख्यालंकारः॥ करौ स्तौति॥ ॥नखानामुद्यो

तैर्नवनलिनरागं विहसतां कराणां ते कांतिं कथय कथयामः कथमुमे। कयाचिद्वासा
म्यं भजतु विधया हंत कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलं॥७१॥ न
खानां कांतिभिर्नवनलिनरागं विहसतां ते कराणां कांतिं हे परमेश्वरि कथं कथयामः
केन सह साम्यं कथयामः त्वं मे कथय। प्रसिद्धं कमलमस्ति तेन सह कथयेति चेत्तन्न।
कयाचिद्वासाम्यं भजतु [illegible] विधया हंत कमलं कयाचिद्विधया कमलं साहश्यं
भजतु। हंतेति वितर्के। यदि क्रीडल्लक्ष्मीचरणतललाक्षारुणदलं स्यात्कमलं सा
म्यं तव कराणां हरनिश्चतु। तव करसाम्यं कमलं तदा लप्स्यते कयाचिद्विधया क्री
डंत्याः कमलायाश्चरणतललाक्षारसारुणं यदा स्यात्तव कराणां कमलसाम्य
कथने का संभावनेति भावः। अत्र कमलस्य कदाचिद्वयोगेन कमलायाश्च
रणलाक्षारुणपसंपर्कः संभाव्य इति भावनालंकारः॥ कुचयुगं स्तौति चतुर्भिः
८ ॥ ॥समं देवि स्कंदद्विपवदनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं।

यदालोक्याशंकाकुलितहृदयो हासजनकः स्वकुंभौ हेरंबः परिमृशति हस्तेन झ-
टिति ॥७२॥ हे देवि युगपत्स्कंदद्विपवदनपीतं स्तनयुगलं सततं प्रस्नुतमुखं त्वं
नवरतं पुत्रयोर्वात्सल्येन त्वं सिंचपयस्त्वन्मुखं नः खेदं हरतु। यथा पुत्रे वात्स-
ल्येन तथा मय्यपि वात्सल्येन खेदं हरतु। यदालोक्याशंकाकुलितहृदयो हासजनकः
मम कुंभौ कथमत्रागताविति भ्रांत्या स्वकुंभौ हस्तेन झटिति परिमृशति। अत्र त्व-
द्दर्शनेन स्तनद्वये कुंभभ्रम इति भ्रांतिर्नामालंकारः॥ ॥अमू ते वक्षोजावमृ-
तरसमाणिक्यकुतुपौ न संदेहस्पंदो नगपतिपताके मनसि नः। पिबंतौ तौ
यस्मादविदितवधूसंगमरसौ कुमारावद्यापि द्विरदवदनक्रौंचवदनौ ॥७३॥
हे नगपतिकीर्तिध्वजरूपे। अमू ते वक्षोजौ अमृतरसपूर्णमाणिक्यघटौ वि-
शेषो किं न इति नः मनसि संदेहस्पंदो वितर्कपरंपराप्रवाहो न वर्तते निरोषः। यतः ५६
पिबंतौ तौ यस्माद्धेतोः अज्ञातवधूसंगमरसौ अद्यापि कुमारौ कौमाराव-

स्थास्थितौ द्विरदवदनक्रौंचवदनौ। अतः स्तनयोरमृतरसपूर्णत्वेन पानमनुमीयत इत्य-
नुमानालंकारो वा॥ ॥वहत्यंब स्तंबेरमदनुजकुंभप्रकृतिभिः समारब्धां मुक्तामणिभि-
रमलां हारलतिकां। कुचाभोगो बिंबाधररुचिभिरंतः शबलितां प्रतापव्यामिश्रां पुरवि-
जयिनः कीर्तिमिव ते ॥७४॥ हे अंब स्तंबेरमदनुजकुंभप्रकृतिभिः गजासुरकुंभप्र-
कृतिभिः समारब्धां रचितां मुक्तामणिभिः निर्मलां हाररत्नतिकां कुचाभोगः बिंबा-
धररुचिभिः अंतः शबलितां अंतः प्रतिबिंबितां प्रतापव्यामिश्रां प्रतापसंवलितां
पुरविजयिनः कीर्तिमिव वहति। महादेवस्य कीर्तिप्रतापोत वहृदयं गतो सर्वदेति
भावः। विमलतरहारे बिंबाधररुचिप्रतिबिंबतया अरुणगुणारोपेण प्रतापसं-
मिश्रकीर्त्युपमानस्य प्रस्तुतत्वादध्यारोपोपमा॥ ॥तव स्तन्यं मन्ये तुहिनगिरि-
कन्ये हृदयतः पयःपारावारः परिवहति सारस्वत इव। दयावत्या दत्तं द्रविडशिशु-
रास्वाद्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता॥७५॥ हे तुहिनगिरिक-

न्येतवस्तन्यंस्तनद्वयंदुग्धंपयःपारावारःसारस्वतःसरस्वतीविलासरूपःहृदयतः
परिवहतीतिमन्येसरस्वतीरूपःसमुद्रःपरिवहतीत्यर्थः।दयावत्यात्वयादत्तंद्रविडशि
शुमध्येसःआस्वाद्ययद्यस्मात्कवीनांप्रौढानांकमनीयःकवयिताअजनि।अत्रेयं
चिरंतनाख्यायिका।भगवतःशंकराचार्यस्यपिताअत्यंतपरमेश्वरीभक्तः।ग्रामाद्ब
हिःपरमेश्वर्याआयतनंगत्वादुग्धेनदेवींसंस्नाप्यपूजांविधायनमस्कृत्यअव
शिष्टंकिंचिद्दुग्धंसंगेगतायशंकराचार्यायप्रयच्छतिबालकस्यमनसिअत्यहंप
रमेश्वरीस्वयंपिबतिपीतशेषंमह्यंददातीतिमतिर्जागर्त्ति।कदाचिद्ग्रामांतरं
गच्छन्बालकस्यमातरंप्रतिउक्त्वागतःअत्यहंमदागमनंयावत्त्वयादुग्धेन
स्नापयित्वाभगवतीपूजनीयास्त्वयेति।सातथाकुर्वाणास्त्रीधर्मिणीजा
तागृहेकोपिनास्तिपुत्रंप्रेषितवतीदुग्धेनभगवतींसंस्नाप्यपूजांविधाया
गम्यतामिति।बालकोगत्वापूजांविधायदुग्धंपुरतोनिधायपरमेश्वरीपि ५७

बेतिनादितवान्।यदाविलंबोजातःभगवतीचनपिबतितदारोदितुमारब्धवा
न्ततःपरमेश्वरीदययाआविर्भूयदुग्धंपीतवतीपुनःपात्रंरिक्तंसमालोक्यस
र्वंत्वयापीतंमदर्थंनरक्षितंकिमपीतिरोदितुंप्रवृत्तःततोविहस्यबालमंकेसमा
रोप्यस्तन्यंदत्तवतीजगदंबास्तनपानेनसर्वाविद्यास्तदानीमेवपुरःस्फूर्तिका
जाताः।कवयन्नेवगृहंगतःएतस्मिन्नंतरेपितासमागतःबालस्योत्कटंवा
ग्विजृंभितंचविलोक्यसत्याश्चर्योभूत्।स्वप्नेचागत्यपरमेश्वरीउक्तवतीअयं
बालःशंकरांशः।अनेनलोकोद्धारोभविष्यतित्वयाचिंतानकार्याममबाल
कोयमिति॥ ॥हरक्रोधज्वालावलिभिरवलीढेनवपुषागभीरेतेनाभीसरसिकृ
तसंगोमनसिजः॥समुत्तस्थौतस्मादचलतनयेधूमलतिकाजनस्तांजानीतेतवज
ननिरोमावलिरिति॥७६॥हेअचलतनयेहरक्रोधज्वालावलिभिःअवलीढेनकवलि
तेनवपुषागभीरेतेनाभीसरसिकृतसंगोमनसिजःअभूदितिशेषः।ननुमग्नोमन

ल्लिज इति क्वचित्पाठः। तस्मान्नाभीसरसः समुत्पन्नो धूमलतिकां तां धूमजन्निकां ज
नो जानीते तव जननि रोमावलिरिति। इयं रोमावलिर्न भवति। धूमलतिकेति भ्रांत्या
रोमावल्यां निषिध्य धूमलतिकायाः प्रतिपादितत्वादपह्नुतिः। हरक्रोधज्वालावलि
तस्यापि त्वमेव शरणं त्वदन्यः परित्राणे न समर्थ इति भावः॥ ॥यदेतत्कालिंदीत
नुतरतरंगाकृति शिवे कृशे मध्ये किंचिज्जननि तव तद्भाति सुधियां॥ विमर्दादन्यो
न्यं कुचकलशयोरंतरगतं तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीं॥ ७७॥ हे शि
वे यदेतत्कालिंदीतनुतरतरंगाकृति कृशे मध्ये किंचिज्जननि तव तद्भाति सुधियो वि
मर्दादन्योन्यं कुचकलशयोरंतरगतं मध्यगतं तनूभूतं अतिसूक्ष्मीभूतं कुहरिणीं ग
ह्वरवतीं नाभिं प्रविशदिव यमुनायास्तनुतरतरंगोपमानं रोमावली। कृशे यदेतत्किं
चिद्भाति इदमित्थमितिव कुमशाकं तत्सुधियां मनसि कुचकलशयोर्मध्यगतं व्योम
नयोः परस्परविमर्दात्कृशं सन्नाभिं कुहरिणीं प्रविशति। एतावता व्यक्ताव्यक्तक

कृशे रोमावल्या ईषत्समुद्भेदो [illegible] निरूपितः। अत्र जननि तव तद्भाति गिरिश
इति पुस्तकः पाठः। जगन्मातुः रोमावली सर्वेषामेव दृग्गोचरा न भवतीति व्युत्क्रमनुचितं
अथवा। सुधिय इति एकवचनं कल्पनीयं सुधियः महादेवस्येति अर्थात्त्वियर्वस्पाति। अ
न्यस्य लोकजनस्य रोमावलीदर्शनस्यायोग्यत्वात्। अत्रोपमा स्पष्टा॥ ॥स्थिरो
गंगावर्तः स्तनमुकुलरोमावलिलताजलावालं कुंडं कुसुमशरतेजोहुतभुजः॥ र
तेर्लीलागारं किमपि तव नाभीति गिरिजे बिलद्वारं सिद्धेर्गिरिशनयनानां विज
यते॥ ७८॥ गंगावर्तः स्थिरः निश्चलः स्तनकोरकलतायाः निजजलावालं आवा
लं गर्तविशेषः कुंडं कुसुमशरतेजोहुतभुजः रतेर्लीलागारं किमपि अत्रतर्वसु
खगृहं बिलद्वारं सिद्धेरिति गिरिशनयनानां विजयते। नान्यस्य तव नाभिं विलोक
एतादृशश्चमत्कारो गिरिशनयनानां भवति। त्रिलोचनव्यतिरिक्तानयनगोचरत्वा
त्। अत्र एकस्या एव नाभेर्गंगावर्तादिभिरनेकारोपात् मालारूपालंकारः॥ ॥

निसर्गक्षीणस्य स्तननतटभरेण क्लमजुषो नमन्मूर्त्तेर्नाभौ वलिषु शनकैस्त्रुट्यत
इव॥ चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा समावस्थास्थेम्नो भवतु कुशलं
शैलतनये॥७९॥ स्वभावक्षीणस्य स्तननतटभरेण ग्लानिं जुषः नमन्मूर्त्तेर्नाभौ
नाभिप्रदेशे वलिषु शनकैस्त्रुट्यत इव स्तननभारेण नमन्नाभिप्रदेशे वलिषु भंग
पुरस्सरतया त्रुट्यन्निव भग्ननिगतात्यर्थः। चिरं ते मध्यस्य एतादृशस्य त्रुटिततटि
नीतीरतरुणा सह त्रुटिततटिन्यास्तोत टिनीतीरतरुश्चेति कर्मधारयः। समावस्थास्थेम्नः
।समाऽवस्थायस्य सः समानः न मन्दह्रिंः वलिषु निम्नोन्नतभावेन त्रुटनि
व एतादृशस्य तव मध्यस्य त्रुटितनदीतीरतरुणा सह समानावस्थास्थैर्यस्य
कुशलं भवतु भङ्गक्लिन्नावेन नाशं सा एतादृशोपि मध्यः नक्तानुग्रहाय शरीरं बि
भ्रत स्तवनत्रुटतीत्यहो आश्चर्यं इति विस्मयाध्वनिः। अथवा एतादृशोपि मध्यः ५९
महादेवभाग्यवशात्तिष्ठतीति भक्तिरसोन्मेषितहास्योक्तिः॥ ॥कुचौ सद्यः

स्विद्यत्तटघटितकूर्पासभिदुरौ कषन्तौ दोर्मूले कनककलशाभौ कलयता॥ तव त्रातुं
भंगादुदरमवलग्नं [illegible] तनु[illegible]नुवा त्रिधानद्धं देवि त्रिवलिलवलीवल्लिभिरिव॥८०॥
हे देवि कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ महादेवविषयकानुरागः रतिस्त
स्यदर्शनक्षणसात्त्विकभावाकलिततटसंसक्तकंचुकभेदौ मुखौ दोर्मूले कषन्तौ घ
र्षन्तौ अयोनितं कनककलशाभौ कलयता तनुभुवा कामेन अवलग्नं मध्यं तनुभु
वा त्रिधानद्धं दे त्रिविवलिलवलीवल्लिभिः हरपरिवेश इति कान्यकुब्जभाषा कलनाभिः
उदरं त्रिधानद्धमिव अनेनोपकारेण मयि सानुग्रहो महादेवो भविष्यतीति ध्वनिः।
रूपमा अत्र स्वभावोक्तिरलंकारो स्पष्टो॥ ॥गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजा
न्नितंबादाच्छिद्य त्वयि हरणरूपेण निदधे॥ अतस्ते विस्तीर्णो गुरुरयमशेषां वसुम
तीं नितंबप्राग्भारः स्थगयति लघुत्वं नयति च॥८१॥ हे पार्वति क्षितिधरपतिः हिम
वान् गुरुत्वं विस्तारं च निजान्नितंबादाच्छिद्य निःज्ञष्य त्वयि हरणरूपेण निदधे।

दुहित्रे देयो द्रव्यो हरणं दायिजमिति लौकिकभाषा। अतस्ते नितंबप्राग्भारः गुरुः
विस्तीर्णः अशेषां वसुमतीं स्थगयति आछादयति प्राग्भारेण गुरुत्वेन वसुमतीशो
भां तिरस्करोतीत्यर्थः। लघुत्वं नयति च तव नितंबप्राग्भारः गुरुः। तस्याः शोभत्या स
कलनम्र बिंबोति लघुकायित इत्यर्थः। नरणरूपेणेति क्वचित्पाठः। नरणं आयु
धादिदानं अयमर्थः। सकलदेवताशरीरसमुत्थिततेजोराशिभूतशरीरो
पाधिमहिषासुरवधायावलंबमानायां त्वयि नरणरूपेण। स्वलं स्वलादिनि
ष्कृष्य ददौत स्यै पिनाकधृगित्यादि देवतानामायुधादि नरणसमये हिमवा
न्वाहनं सिंहं रत्नानि विविधानि चेति दत्वा स्वनितंबाद्गुरुत्वं विस्तारं च निःकृष्य
नरणरूपेण निदधे निर्दिपीकृतवान्। देवाय यास्वायुधादिनरणं कृतवंत
स्तया हिमवानपि नितंबगतगुरुत्वं विस्तारस्सरणं विहितवानित्यर्थः। अतस्त ६०
व नितंबप्राग्भारस्त्वाकृतिविशेषः अशेषां व्याप्तां वसुमतीं स्थगयति। लोकत्रयं

व्याप्य स्थितायास्तव नमयतीत्यर्थः। तथा च मार्कंडेये। महदर्शततो देवी व्याप्तलोकत्रयां त्वि
षा। पादाक्रांतानतभुवं किरीटोल्लिखितांबरां। क्षोभिताशेषपातालां धनुर्ज्यानिस्वनेन तां।
दिशो भुजसहस्रेण समंताद्व्याप्य संस्थितामिति। लघुत्वं नयति च। अतिलघुर्जातः पादा
क्रांत्या नतत्वरितिभावः। ॥ करीन्द्राणां शुंडाः कनककदलीकांडपटलीमुभाभ्यामू
रुभ्यामुभयमपि निर्जित्य भवती॥ सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते
विजिग्ये जानुभ्यां विबुधकरिकुंभद्वयमपि॥ ८२॥ हे गिरिसुते करींद्राणां शुंडाः कनक
कदलीकांडपटली च उभाभ्यामुभयमपि करींद्रस्य शुंडाः कनककदलीकांडसमूहश्च
पत्युर्महादेवस्य प्रणतिकठिनाभ्यां प्रतिदिनं शिवपदार्चनानंतरं कृतप्रणामकठि
नाभ्यां भवति विबुधकरिकुंभद्वयमपि विजिग्ये। शुंडामित्येकवचनं हेलया जिताः
सर्वा इति द्योतनार्थं। एकशुंडेव सर्वाः शुंडा जिता इति भावः। जात्येकवचनं वा॥ ॥
पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते निषंगौ जंघे ते विषमविशिखो बाढमकृत॥

यदग्रेल दृश्यंते दशशरफलाः पादयुगलीनखाग्रछद्मानः सुमुकुटशाणैकनिशिताः ॥८३॥
हे गिरिसुते रुद्रं पराजेतुं ते जंघे निषंगौ द्विगुणं शरगर्भौ विषमविशिखः कामं बाढं अकृ
तेय यतः अग्रे निषंगौ ततयो जंघयोरग्रे दश शरफलाः अय नागाः शल्यानि दृश्यंते
नखाग्रछद्मानः नखाग्रछलाः सुरमुकुटशाणैकनिशिताः वंदनानतसुरमुकु
टात्मैव शाणाः तैर्निशिताः संमार्जिताः पूर्वं पंचशरः अधुनात्र जंघे निषंगौ दशशर
गर्भौ इति ज्ञाने ष्यतीति दशशराः संतीति किमाश्चर्यमिति भावः ॥ अत्र एतेन नखानं तदु
निकिं उद्विगुणीकृत शारशल्यानीति प्रकृत नखनिषेधादपह्नुतिः ॥ ॥श्रुतीनां
मूर्धानो दधति तव यौ शेखरतया ममाप्येतौ मातः शिरसि दयया धेहि चरणौ ॥ य
योः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्लाक्षालक्ष्मीररुणहरिचूडामणि
रुचिः ॥८४॥ हे मातः श्रुतीनां मूर्धानः उपनिषदः यौ तव चरणौ शेखरतया दधति ६१
मूर्धन्यतया बिभ्रतीति तावेतौ ममापि शिरसि धेहि ययोः पाद्यं पाथः पाद्यजलं पशु

पतिजटाजूटतटिनी गंगा ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः विष्णोः शिरोभूषण
माणिक्यं अलक्तकरागः मानापनोदनाय शिवशिरोधार्यगंगाजलं ययोः पाद्यजलायते प्रण
मत्सहरेर्मुकुटविन्यस्तमाणिक्यरुचिरलक्तकरागायते मम मौलौ निधाय कृता
र्थी कुरु मामिति सर्वथः गंगाजलं चूडामणिरुचः पाद्यत्वलाक्षालक्ष्मीत्वारोपादारोपो रू
पकविशेषः ॥ ॥नमोवाकं ब्रूमो नयनरमणीयाय पदयोस्तवास्मै द्वंद्वाय स्फुटरुचि
रसालक्तकवते ॥ असूयत्यत्यंतं यदभिहननाय स्पृहयते पशूनामीशानः प्रमदवन
कंकेलितरवे ॥८५॥ हे मातः नयनरमणीयाय तवास्मै पदद्वंद्वाय नमोवाकं ब्रूमः न
मस्कारसूक्तं ब्रूमः वाचनिकं नमस्कारं कुर्मः इत्यर्थः ॥ स्फुटरुचिरसालक्त
कवते प्रकाशमान कांतिद्रवयावकवते ॥ यदभिहननाय स्पृहयते प्रमदवनकं
केलितरवे क्रीडावनरक्ताशोकाय अशोकस्य चरणाघातात् जायते पुष्पवत्त्वमिति दो
हदं वांछते पशूनामीशानः महादेवः । असूयति जगदंबिकाचरणाघातं मया वांछ

नायं त्वं कथं वीक्षसि पुष्पसमृद्धिस्तव ममानुग्रहाद्देव न भविष्यतीति। एतावता परमेश्व
रीचरणस्पर्शीयत्र शिवोपि वांछति तत्रास्मदादीनां जन्मांतरसुकृतं विना जगदंबायाश्च
रणसेवा न लभ्यत इति भावः॥ ॥मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणयुगलेनाडयति ते॥ चिरादंतःशल्यं दहनकृतमुन्मीलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा॥८६॥ हे परमेश्वरि मृषा कृत्वा गो
त्रस्खलनं मिथ्यासपत्नीनामग्रहणं विधाय अथ वैलक्ष्यनामितं साध्वसभावेन न
मितं भर्तारं शिवाय प्रात्तव चरणयुगलं ललाटे ताडयति सति चिरादंतःशल्यं द
हनकृतपुरीज्वलनपनदहनविहितदाहदुःखमुन्मीलितवता उत्कीर्णवता ईशा
नरिपुणा तुलाकोटिक्वाणैः पादांगदनिःस्वनैः किलिकिलितं किलिकिलितध्वनि
नाउपहासितं। पूर्वमहं त्वत्पादग्धः इदानीमहं मातुःशरणंगतः मां किं कर्तुं समर्थो ६२
सीति एते तुलाकोटिक्वाणा न भवंतीति किंतु ईशानरिपुणा संतोषेण किलिकिलि

तध्वनिः कृत इत्यप्रकृतिः। अत्र ईशानो रिपुर्यस्येति बहुव्रीहिः। न तु तस्य पुरुषस्य
पुरुषे सति कास्येव वक्षास्यो त्कर्षः स्यात्। यत्र मृषा गोत्रस्खलनं विधाय पि शिवः
जगदंबाचरणस्पर्शं वांछितवान्। अतोस्मदादीनां परदेवतायाश्चरणसेवा पु
ण्यं विना न लभ्यत इति ध्वनिः॥ ॥हिमानीहंतव्यं हिमगिरितटाक्रांतिचतुरौ नि
शायां निद्राणं निशि च परभागे च विशदौ॥ परं लक्ष्मीपात्रं श्रियमतिसृजंतौ समय
तां सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किं॥८७॥ हे जननि त्वत्पादौ सरोजं ज
यतः। इह किं चित्रं। यतः सरोजं त्वत्पादौ हिमानीहंतव्यं हिमगिरितटाक्रांतचतुरौ
तव पादौ निशायां निद्राणं मुकुलितं निशि च परभागे च विशदौ। रात्रिं दिनं विक
स्वरौ परं लक्ष्मीपात्रं लक्ष्म्या आधारभूतं रामायिनां नव चरणनक्तिभावप्रति
पादकशास्त्रनिष्ठानां श्रियं सृजंतौ एतादृशौ तव पादौ सरोजं जयतः। अत्र को
यं विस्मयः। अत्रोपमानं तु कीर्त्युपमेयस्यातिशयप्रतिपादनादतिशा

योक्तिः॥ ॥पदं ते कीर्तीनां प्रपदमपदं देवि विपदां कथं नीतं सद्भिः कठिनकमठीकर्परतु-
लां॥ कथं वा बाहुभ्यामुपयमनकाले पुरभिदा तदादाय न्यस्तं दृषदि दयमानेन मनसा
॥८८॥ हे शिवे देवि ते प्रपदं पादाग्रं कीर्तीनां पदं स्थानं विपदामपदं अनाधिकरणं काल-
त्रयेपि विपत्संबंधविधुरं सद्भिः पुरातनकविभिः कठिनकमठीकर्परतुलां कठोरकच्छ-
पीपृष्ठकर्परसाम्यं कथं नीतं गूढगुल्फपदद्वयप्रपदां युतकच्छपामित्यादौ पुरनि-
दा हस्ताभ्यामुपयमनकाले विवाहप्रत्यक्ताश्मारोपणकाले दयमानेन मनसा
दयासंवलचेतसा तदादाय दृषदि कथं वा न्यस्तं गजत्वगपाकर्षणकठिनाभ्यां ह-
स्ताभ्यां आदाय दृषदि कथं न्यस्तं। अहो चित्रं न कवीनां पुरभिदश्चाविवेक इति भा-
वः। नायं श्लोकः शंकराचार्याणां स्तोत्रदीपिकमल्लिवालदेशीयानां पुस्तकेयतो नास्ति
नापि दाक्षिणात्यपुस्तकेषु नापि पाठतो व्याख्यातिः॥ ॥नखैर्नाकस्त्रीणां करकमल- ६३
संकोचशशिभिस्तरूणां दिव्यानां हसत इव ते चंडि चरणे॥ फलानि स्वःस्थेभ्यः किस-

लयकराग्रेण ददतां दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ॥८९॥ हे चंडि भक्तज-
न विपद्विपिनच्छेदनप्रचंडे। नाकस्त्रीणां देवांगनानां करकमलसंकोचशशिभिः
प्रणामसमये देवानागनानां करकमलमुकुलीकरणशशिरूपैर्नखैस्ते चरणे दिव्या-
नां तरूणां हसत इवाकर्मणि षष्ठी॥ कल्पतरून् हसत इत्यर्थः। हास उ महिमा फलानि
इष्टानि स्वस्थेभ्यः सुखेन तिष्ठद्भ्यः अथवा स्वर्गस्थेभ्यः किशलयकराग्रेण ददतां कि-
सलयकराग्रेण अयच्छतां दरिद्रेभ्यः श्रियमनिशमह्नाय सर्वदात्यर्थं नेदामनस्व-
रांचितरं तौ कल्पतरवः मरणानंतरं स्वर्गस्थेभ्यः सुखेन तिष्ठद्भ्यो देवेभ्यः स्वफलानि किस-
लयकराग्रेण ददतौ चरणौ चंद्रिकाचमत्कारकारिकिरणोल्लसितदिगंतैः नखशशिभिः
कल्पतरून् हसत इत्यर्थः। अत्र स्वःस्थेभ्य इति श्लिष्टपदसामर्थ्यात् कल्पतरुविषयक-
हासोऽनुद्योतितः इति समासोक्तिः स्वभावतस्तरवः कराग्रेण स्वर्गवासिभ्यः कतिपय-
दिनेर्न [illegible]मां श्रियं कदाचिद्ददतस्त्व चरणौ ऐहिकामुष्मिकसुखसंतानसमुद्धासि

ष्ट रं।

सौं.ल.

तोऽप्रियंवितरंतौ।हसंतइतिकिमाश्चर्यमितिभावः॥ ॥कदाकालेमातःकथयकलिता
लक्तकरसंपिबेयंविद्यार्थीतवचरणनिर्णेजनजलं॥प्रकृत्यामूकानामपिचकवि
ताकारणतयायदाधत्तेवाणीमुखकमलतांबूलरसतां॥९८॥हेमातःकदाकाले
कस्मिन्समयेकलितालक्तकरसंसंपृक्तयावकरसंतवचरणनिर्णेजनजलंचरणा
क्षालनजलंविद्यार्थीपिबेयं।यत्प्रकृत्यामूकानामपिकविताकारणतयाकविता
विषयेहेतुतयावाणीमुखकमलतांबूलरसतामाधत्ते।सरस्वतीवदनकमलानां
बूलरसतामाधत्ते।सरस्वतीवदनकमलतांबूलरागशोभांकरोति।तांबूलाकलि
तसरस्वतीवदनवाग्विलासस्फूर्तिलहरीसमुन्मेषहेतुर्यद्भवतितत्कदापिपिबेयं।कप
येत्यर्थः।यद्यपिसर्वैस्त्वन्यदानेनाहंकृतार्थोजातः।किंतुतदाममसंदर्शनानंतरंवात्स ८
ल्याद्भावात्स्ववस्तुस्वरूपमजानतः।भक्तिभावेनप्रणम्यचरणोदपानंनाकृत।अधुनापु ६४
नःसंदर्शनंप्राप्यभक्तिभावेनप्रणम्यचरणोदकपानंकदाभावीकथयेतिभवता

उं

वांकारोऽस्म्यपः॥ ॥पदन्यासक्रीडापरिचयमिवारब्धुमनसःस्खलंतस्तेखेलंभवन
कलहंसानजहति॥त्वविक्षेपेशिक्षांसुभगमणिमंजीररणितच्छलादाचक्षाणं
चरणकमलंचारुचरिते॥९१॥हेचारुचरितेपदन्यासक्रीडापरिचयमारब्धुमनसः
स्खलणविक्षेपलीलाचातुर्यमारब्धुंकामयमानाः खेचरंतःक्रीडामारचंतःस्ववि
क्षेपेस्वस्यविक्षेपेसुभगमणिमंजीररणितच्छलात्शोभमानमणिनूपुरनिक्वा
णच्छलेनशिक्षामाचक्षाणंतेचरणकमलंहंसानजहतिनत्यजंति।अद्यापिप्रति
दिनमभ्यस्यमानास्तवचरण विन्यासेनलीलांनत्यजंतीतिभावः॥ ॥गता
स्तेमंचत्वंद्रुहिणहरिरुद्रेश्वरभृतःशिवःस्वच्छच्छायाघटितकपटप्रच्छदपटः॥त्वदी
यानांभासांप्रतिफलनरागारुणतयाशरीरीशृंगारोरसइवदृशांदोग्धिकुतुकं
॥९२॥हेमातःद्रुहिणहरिरुद्रेश्वरभृतःपृथिव्यप्तेजोवाताधिपब्रह्मविष्णुरुद्रेश्व
रैःपंचचरणत्वंगताः।ततःशिवःसदाशिवःव्योमाधिपतिःस्वच्छच्छायघटितकपटप्र

छदपटः। तु॰ त्वकांत्या घटितं कपटं छद्म यस्य प्रच्छदपटस्य आस्तरपटस्य ताद्दशात्त्व
वमेव त्वं गतः सदाशिवः स्वच्छकांतिरूप आस्तरणपटः त्वदीयानां भासां प्रतिफल
नसात् आरुण्यतया त्वत्कांति प्रतिबिंबनोत्थारुण्यभावेन शृंगाररसः शरीरीव दृशां कु
तुकं दोग्धि परमशिवनेत्राणां कौतुकं तनोतीति तथा रुद्रयामले। ब्रह्मा विष्णुश्च रुद्रश्च
ईश्वरश्च सदाशिवः। एते पंच महाप्रेताः तत्त्वाधिपतयो मताः। चत्वारो मंचचरणाः
पंचमः प्रच्छदः पटः। सचित्रकाशरूपेण शिवेनाभिन्नविग्रहाः। तत्रासनसमासीना।
निर्भरानंदरूपिणीति। यद्यपि शृंगारः श्याम इति संगीतशास्त्रादौ प्रतिपादितः। तथापि
शृंगारस्यानुरागप्रधानरजोगुणमयत्वादरुण्यगुणादि प्रतिपादितः॥ ॥अराला
केशेषु प्रकृतिसरला मंदहसिते शिरीषाभा गात्रे दृषदिव कठोरा कुचतटे॥ भृशं तन्वी
मध्ये पृथुरपि वरारोहविषये जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा॥ ९३॥ के ६५
शेषु कुटिलास्वभावसरला मंदहसिते शिरीषाभा गात्रे दृषदिव शिलेव कुचतटे क

ठोरा। भृशमत्यर्थं तन्वी मध्ये पृथुरपि विपुलापि वरारोहविषये। नितंबविषये जगत्त्रा
तुं शंभोर्जयति करुणा काचिदरुणा। वस्तुतः मायाच्छिवा विनाकृत विच्छिन्नः शरीरपरि
ग्रहो नास्ति जगत्त्राणरूपताद्दशशरीरोपाध्यवलंबनमिति भावः। कुटिलत्व सरलत्वयोः
कठोरत्वमृदुत्वयोः तनुत्व पृथुत्वयोरेकाधिकरणे प्रतिपादनाद्विरोधाभासः। अव
यवगतधर्माणां अवयविन्यारोपादवयवावयविनोरभेदो रूपकविशेषः। अ
ध्यारोपोपमापर्यायः। यथा। त्याज्यः कुटिलसंसर्गो निस्पृहेण प्रियत्नतः। स्वभावनि
र्मला गंगामरंगैः कुटिलायत इति जगत्त्राणकरुणया रणताद्दशशरीरोपाधिकमव
लंबमाना अनर्घैश्वर्यधुर्या। संभारगुणगणविशिष्टा काचिच्छक्तिर्जयतीति
वाक्यार्थः॥ ॥समानीतः पद्भ्यां मणिमुकुरतामंबरमणिर्भयादास्यस्यांतःस्ति
मितकिरणश्रेणिमसृणः॥ दधाति त्वद्वक्त्रप्रतिफलनमश्रांतविकचं निरातंकं चं
द्रान्निजहृदयपंकेरुहमिव॥ ९४॥ मणिमुकुरतां पद्भ्यां मणिमयादर्शनत्वं शो

मानीतःप्राप्तः। अंबरमणिः। आशान्तयार्द्रंतास्तिमितकिरणश्रेणिमसृणः। स्विकिरणःस
न्नखेंदुरूपइतिफलंदधातिकिमिव। अश्रांतंविकचं अनवरतंविकसितंचंद्रान्ति
रातंकंअस्तानंनिजहृदयपंकेरुहमिवादर्पणं। न्नतेदिनमणेस्तववदनंबिंबितंतस्पहृ
दयंकमलायतइतिभावः। समानीतःप्राप्तामितिकचित्पाठः। तवचरणाभ्यांमणिमुकु
रतांसमानीतः। तादर्थ्येचतुर्थी। तवचरणा र्थंमुकुरतांप्राप्तस्सूर्यः। तवचरणप्रति
फलनयोग्योयं। वदनप्रतिबिंबधारणेकाशक्तिस्तस्यतथापि तवकरुणयावदनप्र
तिबिंबंधत्तेइतिभावः॥ ॥कलंकःकस्तूरीरजनिकरबिंबंजलमयंकलाभिःकर्पू
रैर्मरकतकरंडंनिबिडितं। अतस्त्वद्भोगेनप्रतिदिनमिदंरिक्तकुहरंविधिर्भूयोभूयो
निबिडयतिनूनंतवकृते॥९४॥ कलंकःकस्तूरीकलंकोनभवति। जलमयमिदंरज
निकरबिंबंमरकतकरंडंनचंद्रबिंबंअतएवकलाभिःकर्पूरैः। कलाःकलानभवंति ६६
किंतुकर्पूरैस्तैर्निबिडितंपूरितं। अतस्त्वद्भोगेनतववदनतांबूलभोगेनप्रतिदिनमिदं

रिक्तमथ्यंविधिःभूयोभूयःनिबिडयतिपुनःपुनःपूरयति। तवकृते। असितपक्षेरि
क्तंजलमयंजलवदतिनिर्मलंचंद्रबिंबरूपंमरकतकरंडंकलारूपकर्पूरैःपूरयतीत्य
र्थः। अत्रायमभिप्रायः। असितपक्षेप्रतिपदादितिथिषु अग्निः रविःविश्वेदेवाःवरुणो
वषट्कारःइंद्रःदेवर्षिगणःअजएकपात्। यमःवायुःउमापितृगणःकुबेरःपशुपतिः
प्रजापतिःइतिपंचदशदेवेषुदेवतारूपेणानुस्यूताप्रतिज्ञासमानाएताःशक्तयःस्वेन
वक्त्रेणताडीःकलाःअमृतमयाःपिबसित्वमेवअमृतपानेनतेषुसाधारणश
क्तिरूपास्फुरसिनतुकेमार्कंडेय। यत्रकिंचित्क्वचिद्वस्तुसदसद्वाखिलात्मिके। तस्य
सर्वस्ययाशक्तिःसात्वंकिंस्तूयसेमयेति। मंत्रदेवप्रकाशिकायांचसर्वत्रानुस्यूतादे
वतारूपेणप्रतिज्ञासमानाएकैवचिच्छक्तिरूपादिभेदेननानाप्रतिभासइति। अ
नश्चंद्रबिंबंकस्तूरीबंधप्रतिपादनादपकृतिश्लेषकारइति। वस्तुतस्तु। असितपक्षे
कामेश्वरीभगमालिनीनित्यक्लिन्नाभेरुंडावह्निवासिनीवज्रेश्वरीशिवदूतीत्वरिता।

कुलसुंदरी॥नित्या।नीलपताका॥विजया।सर्वमंगला।ज्वालामालिनी॥चित्राइतिपंच
दशनित्याभिः।प्रतिव्योमगता।चिंतचाधिष्ठानभूतं रजनिकरबिंबंजलमयंअमृतबीजं
वकारात्मकंबिंदुंरिक्तकुहरंषोडशस्वरसंचितकमलामात्रावरोपितं त्र्यो—त्र्यपःसि
तपक्षे अनुलोमेन कामेश्वर्यादिचित्रांततिथिनित्याःकृष्णपक्षेलागतिःप्रसरयंती
तिपरमार्थः।तथाच भगवच्छंकराचार्यैरुक्तं।लक्ष्मंसदावहतुमेमनसित्वदीयं
तेजःपरंबहलकुंकुमपंकशोणं।भास्वत्किरीटममृतांशुकलावतंसंमध्येत्रिकोण
निलयंपरमामृतार्द्रमिति।कलंकःकस्तूरीकलंकःअंकचिह्नंकथंकोलोकापवाद
इत्यमरः।रत्नाकाराररवासाचकस्तूरीवासनावासितानिचक्राणिसर्वसिद्धिप्रदानि
वैंदवचक्रेवासनयावासितानियतः।तथाचयोगिनीहृदये।पंचशक्तिचतुर्वह्निसं
योगाच्चक्रसंभवः।।इतश्चक्रावतारंतुकथयामितवानघे।यदासापरमाशक्तिरिच्छ ६३
याविश्वरूपिणी।।स्फुरत्तामात्मनःपश्येत्तदाचक्रस्यसंभवः।शून्याकाराद्विसर्गांताद्विंदु

प्रस्पंदसंविदः।प्रकाशपरमार्थत्वात्स्फुरत्तालहरीयुतात्।प्रसृतंविश्वलहरीमेयमातृ
प्रमात्मकं।वैंदवंचक्रमेतस्यत्रिरूपत्वंपुनर्भवेत्।धर्माधर्मौतथात्मानोमातृमेयौ
तथाप्रमा॥नवयोन्यात्मकंचक्रंचिदानंदघनंमहदिति।इत्यस्मिन्पक्षेऽर्थः॥ ॥पुरा
रातेरंतःपुरमसिततस्त्वच्चरणयोःसपर्यामर्यादातरलकरणानामसुलभा।।तथाप्ये
तेनीताःशतमखमुखाःसिद्धिमतुलांतवद्वारोपांतस्थितिभिरणिमाद्याभिरमराः॥
९५॥त्वंपुराराते रंतःपुरमसियतःकारणेनैकेनशरेणइंद्रादिदैवतैरजेयान्पुरत्रय
वासिनोदग्धवान्।तस्यावरारोहासितत्तःतेनकारणेनत्वच्चरणयोःसपर्यामर्या
दाप्रकारनिष्ठातरलकरणानांअजितेंद्रियाणांअसुलभादुःप्रापातथाप्येतेशतम
खमुखाःदेवाःअतुलांसिद्धिंनीताः।रंभादिस्पर्शवैश्यारतिपरंत्वात्रअपितवचरणस्म
रणपूर्वकपूजामहिम्नातवद्वारोपांतस्थितिभिरणिमाद्यादिशक्तिभिरेवअतुलां
सिद्धिंनीताःनिरुपमभोगसंभावितसांसारिकानंदमनुदिनाभियंप्रापिताःसाक्षा

सौं.ल

न

त्तवदर्शनंचतेषांकथंजवतिमहादेवांतःपुरत्वादितिनावः॥ ॥कलत्रंवैधात्रंकतिकति
भजंतेनकवयःश्रियोदेव्याःकोवानभवतिपतिःकैरपिधनैः॥महादेवंहित्वातवसतिसती
नामचरमेकुचाभ्यामासंगःकुरबकतरोरप्यसुलभः॥९६॥वैधात्रंकलत्रं सर
स्वतींकतिकतिकवयोनभजंते।अपितुबहवोभजंते।श्रियोदेव्याःकोवापतिर्नभव
तिकैरपिधनैः।कतिपयदिनविनश्वरैःकुवेरेंद्रादिभिःसुरगणःमहादेवंविहायसति
सतीनामचरमेआद्ये।अनुसूयारुंधतीनाम्रभृतीनांपतिव्रतानांत्वमेवपातिव्रत्य
धर्मनिर्देशिनी।तिभावः।तवकुचाभ्यामासंगःअंडेषत्कुरबकतरोरप्य सुलभः
।दोहनेनापिनाश्लेषोभृत।कुरबकतरोरित्यर्थः॥सरस्वतीलक्ष्मीप्रसादेनापातरम
णीयंकवित्वधनधान्यसुखमनुभवंति।तवप्रसादेनाद्वयस्वरूपपरमानंदमनु
भवंतीतिध्वनिः॥ ॥स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितोनिषेव्यांनित्यं ६८
त्वामहमितिसदाभावयतियः॥किमाश्चर्यंतस्यत्रिनयनसमृद्धिंतृणयतोमहासं

वर्ताग्निर्विरचयतिनीराजनविधिं २९ स्वदेहोद्भूताभिःस्वदेहोद्भवाःउत्पन्नाःया स्ताःकांत
यःताएवघृणयःकिरणाःस्तैःअणिमादिभिःआवरणदेवताभिःनिषेव्यांसेव्यमानांत्वांअह
मितिअभेदेनयोभावयतितस्यत्रिनयनसमृद्धिंअप्रतिहत छास्वरूपांकर्तुंसमर्थतांत्रिणयत
स्तृणीकुर्वतःमहासंवर्ताग्निःमहाप्रलयाग्निःनीराजनंविरचयति।किमाश्चर्यंअताहश्या
अनेकभावनयात्वत्सारूप्यप्राप्तवतःपश्चात्परमानन्दनिजयाश्चसंचिदुल्लासलक्षणःत्वत्सायु
ज्यंलभ्यतोमहाप्रलयाग्निर्नीराजनविधिमंगलदीपावलयपरिभ्रमणविभ्रमंभ्रयतीतिकिं
मद्भुतम्।प्रलयानलेपित्वद्भक्तशवत्राविज्रंभतइतिभावः।तदुक्तंकादिमते।त्वद्देहोत्थितजो
भिःकिरणैरणिमादिभिः।आवृतांत्वामहमितिभावयंस्त्वत्समोभवेदितितथाचभगवान्द
त्तात्रेयः।अरुणाकरुणातरंगिताक्षीधृतपाशांकुशपुष्पबाणचापाम्।अणिमादिभिरावृ
तांमयूखैःरहमित्येवविभावयेनवानीमिति॥गिरामाहुर्देवींद्रुहिणगृहिणीमागमविदोहरेःपत्नीं

सौं·स·

पद्मांहरसहचरीमद्रितनयां॥तुरीयाकापित्वंदुरधिगमनिःसीममहिमामहामायेवि
श्वंभ्रमयसिपरब्रह्ममहिषि॥९९॥गिरांदेवींसरस्वतींद्रुहिणगृहिणीमागमविदःवेदविदःहरेः पा२ द्वि
हर३ पत्नींपद्मांलक्ष्मींहरसहचरीमद्रितनयांहेमवतीमाहुः॥हेमहामायेत्वंपुनःतुरीयाएतत्र
यातिरिक्तादुरधिगमनिःसीममहिमासरस्वतीमाहुः॥हेमहामायेत्वंपुनःतुरीया॥एतत्र
यातिरिक्तादुरधिगमनिःसीममहिमालक्ष्मीपार्वतीपरिछिन्नरूपातीतावेदवादरतादि
भिःदुरधिगमापारमहिमामहामायोपाधिमवलंबमानाविश्वंभ्रमयसि।भ्रूयोन्नयः
आवर्त्तयति।वस्तुतस्त्वंसर्वसाक्षिणीविजृंभसेवाणीलक्ष्मीपार्वतीतिमायाविलासस्तवे
तिभावः॥तदुक्तंवासिष्ठे।विश्वनाटकविलाससाक्षिणींसंविदेवपरतोविजृंभितेति॥निः
सीममहिमेतिशिवंतःशब्दः।हरस्यत्वद्भ्रांतिजन्यतइतिभावनयास्तूचितसारूप्यंभ्र ६९
वनाविशदयति॥ ॥समुद्भूतस्थूलस्तननभरमुरश्चारुहसितंकटाक्षेकंदर्पाःकतिच

नकदंबघ्नतिवपुः॥हरस्यत्वद्भ्रांतिमनसिजनयामासविमलाःनवत्यायेन्नक्ताःपरिण
तिरमीषामियमुमे॥१००॥हेउमेन्नवत्यायेन्नक्ताःविमलामनोवाक्कायकर्म्मभिः॥भवच्च
रणोपासनपराःदंभादिदोषरहिताःयेतेषाममीषामियंपरिणतिः।उपासनायाःफलप
रिणामःसाकासमुद्भूतस्थूलस्तननभरमुरःचारुहसितंकटाक्षेकंदर्प्याःकतिचनकटाक्ष
विक्षेपेकतिचनकंदर्पाःविलसंतिदग्धःएककंदर्पःकटाक्षविक्षेपेणबहवोजीवितान्न
वंतीतिभावः॥कदंबघ्नतिवपुःरोमांचकंचुकितंवपुः।महादेवालोकेनसमुद्भूतसात्वि
कभावमितिहरस्यमनसित्वद्भ्रांतिंजनयंति।एवंरूपादिपरिणतिर्भवतिसारूप्यंत्रा
प्यतेवेवसन्निधौसरस्वइववर्त्तमाना।त्वमिवमहादेवस्यमनसिप्रतिभातीति।अनेन
सर्वोक्तभावनायाःफलमहिमाप्रतिपादितः॥अत्रभ्रांतिमानलंकारः॥ ॥सरस्वत्याल
क्ष्म्याविधिहरिसपत्नोविहरतेरतेःपातिव्रत्यंशिथिलयतिरम्येणवपुषा॥चिरंजीवन्नेव
क्षपितपशुपाशव्यतिकरःपरब्रह्माभिख्यंरसयतिरसंत्वद्भजनवान्॥१०१॥सरस्व

सौं·स·

प्रति२

त्या अनवरतमुन्मीलितगद्यपद्यादिसूक्तिविलाससमुन्नतविद्यया त्वद्रूपा निरुपमसं
पदां समुद्भूतविविधविभ्रमेण विधिहरिसपत्नः । ब्रह्मविष्णुस्पर्धी रम्येन वपुषा कमनी
यतरवपुषा रतेः पातिव्रत्यं शिथिलयति एतद्विचारयति । अयमेव कामः कथं न जातु इति । न
चिरंजीवन्नेव क्षपितपशुपाशव्यतिकरः । चिरंजीवी सन्नेव दूरीकृतपशुपाशः पशव इव
पशवः । अनादिसिद्धाविद्यातिमिरांधाः तेषां पाशः पुनः संसारदुःखरातानुबंधः जन्मम
रणादिदुःखसंसारबंधहेतुः संसारपाशः तस्य व्यतिकरः संपर्कः । जीवन्मुक्त इत्यर्थः ।
परब्रह्माख्यं ब्रह्मानंदरसदिल्लसौभाग्यं रसयति आस्वादयति अकुर्वदित्यर्थः । बहुज
नवान् ॥ ॥ निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे निराबाधज्ञाने नियमपरिचि
त्तैकनिलये ॥ नियत्या निर्मुक्ते निखिलनिगमांतस्तुतिपदे निरातंके निगमय ममापि
स्तुतिमिमां ॥१०२॥ निधीयते जगदस्यामिति निधिः । जगदाधारभूते । तथा च मार्कंडेये । १०
आधारभूता जगतस्त्वमेकेति । नित्यस्मेरे सर्वदानंदनिर्भरहासोन्मेषलसद्वदने । ननु

निसे२

जगदाधारभूते इति पूर्वं प्रतिपादितं अधुना तु नित्यस्मेरे इत्युच्यते स्मेरता शरीरधर्मः जग
दाधारभूता शक्तिरशरीरा अतः इत्थंत्रसंबोधनयोः परस्परविरोध इत्यत आह । निरवधि
गुणे निरवधयः [illegible] असंख्याता शक्तिविलासाः गुणाः यस्याः न्यक्कानुग्रहगृहीतशरी
रायाः स्मेरतारतम्यं अतः कश्चिद्राजा कश्चित्प्रभुः कश्चिद्दरिद्रः कश्चिद्विरक्तः इत्यत आ
ह । नीतिनिपुणे नीतौ निपुणा यथादृशो यस्याग्रह उचितः अनाद्यविद्यासंवलिततत्कामानु
बंधतादृशानुग्रहः तर्हि कर्मपारतंत्र्यं भगवत्या न तु स्वातंत्र्यं इत्यस्मदादिसमानतेत्य
त आह । निराबाधज्ञाने आघाटः एव संतापपरिमाणाघनात् निराघाटः अखंडः तादृ
शं संविदुल्लासरूपे अस्याः सांनिध्यवशान्न नचक्रिसमवायेन न तत् तत्कर्मानुभावो
भवतीत्यर्थः । एतादृशी कथमुपास्या भवति ध्यानादिचिराकलितम योग्यत्वादित्य
त आह । नियमपरिचित्तैकनिलये ये जपपूजाध्यानादिनियमैरुपासते चित्तैकनि
लये तेषां चित्ते आविर्भूततया प्रकाशत इत्यर्थः । तर्हि भगवत्याः नियमपरिचित्तैक

नित्यप्रकाशमानं तान्यत्रेति नियतिपरतंत्रता जाते त्यत आह। नियत्या निर्मुक्ते स्व
तया नियमपरिवृत्ते प्रकाशते न तु नियतिपरतंत्रतया यथा कल्पद्रुमः सर्वं साधार
णोपि सेवापराणां फलदाता नान्येषां। यथा वा सूर्यः जलादौ निर्मलवस्तुनि प्रतिबिं
बते नान्यत्र तेन न सूर्यस्य नियतिपारतंत्र्यं तथैतिन्नावः। परात्वादेवतायाः सद्भावे
किं प्रमाणमित्यत आह। निखिलनिगमांतस्तुतिपदे। सकलवेदांतसूक्तपदे वेदांता
उपनिषदः ताभिः उपलक्षितपदे उपनिषदः प्रमाणमित्यर्थः। केन प्रकारेणोक्ते त
पदात्तमेवप्रकारमाह। निरातंके निर्भये। तथा च श्रुतिः। अभयमजरमामिनं वस्तु
त्नमविकारं केवलं चिद्रूपनमानमयं ब्रह्मेति। एवं प्रकारेणोक्ते इति निगममममा
पिस्तुतिमिमां निगमय निगमं कुरु। तत्करोतीत्यर्थे णिच्। वेदमिव सर्वं संप्रतिपन्नां
कुरु। यथा वाल्मीकिव्यासादीनां वाचः स्मृतिपुराणेतिहासादयः निगमवत्सर्वं प्रतिप ११
न्नास्तथा ह्येताः तथा ममापीयं स्तुतिर्निगमीक्रियतामित्यर्थः। तथा च कूर्मपुराणे। नग

वधूत्वं नं हिमवंतं प्रति। वेदरूपा परा शक्तिर्मम लोके प्रवर्त्तते। तया दृष्टानि कर्माणि
ऋर्वेति मुनिसत्तमाः। देवर्षयो राजर्षयो व्यासादिमुनयस्तथा। तैः प्रणीतानि सर्वाणि
कल्पसूत्रमुखानि वै। धर्मशास्त्रपुराणानि सेतिहासस्मृतानि च। ज्ञेयानि वेदवन्नानि
नात्र कार्या विचारणेति। अत्र बहुप्रकाशकेषु एकक्रियायोगान्मालादीपकालंका
रः। किं च मयास्तुतिरपि न कृते ऽत आह॥ ॥प्रदीपज्वालाभिर्दिवसकरनीराजन
विधिः सुधासूतेश्चंद्रोपलजललवैरर्घ्यघटना॥ स्वकीयैरंभोभिः सलिलनिधिसौ
हित्यकरणं त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं॥१०३॥ यथा प्रदीपज्वाला
भिः दिवसकरनीराजनविधिः तेजोनिधेः दीपशिखायाः नीराजनं। सुधासूतेः अ
मृतप्रसूतिपदस्य चंद्रोपलजललवैः चंद्रकांतनिःस्यंदसलिलबिंदुभिरर्घ्यघटना
अर्घ्यदानं। स्वकीयैरंभोभिः सलिलनिधेः सौहित्यकरणं समुद्रस्यैव जलैः समुद्रतर्प
णं समुद्रस्य तृप्तं। तथा त्वदीयाभिर्वाग्भिर्मातृकास्वरूपाभिरेव तव मातृकाक्षरैस्त

वेस्कतिः।परापश्यंतीमध्यमारूपयात्वयैवोल्लासितैर्वैखरीसमुज्जृंभितत्वन्मयसामा
ह्यकारैःत्वयैवज्ञातिरितिमनुष्हतोकोऽईतेवनास्ति त्वमेवसर्वत्रानुस्यूतावेतनाग
पाप्रतिभाससइतिभावः।१।श्रीसौंदर्यलहर्य्याःटीकासौभाग्यवर्द्धनीनाम्ना।।कैवल्या
श्रमरचिताविलसतुपरदेवताप्रमोदकरी।।२।।अज्ञाऽबद्धलतधियःसत्यमालोक्य
नत्वतः।शोधयंतुविशेषज्ञावद्धःसंतोषमंजलिः।।३।।किंविज्ञापनयानुपायइतिवि
दस्मच्चेतेरथ्यंथेऽत्रस्वयमेवसाधुपुरुषाद्दूरीकरिष्यंतिलिनत।।सन्मार्गेपतिता
निकंटककुलान्यालोक्यकिंसाधवोदूरीकृत्यनयांनितानिपांथिकाःकंटैपरं[illegible]
हितं।।४।। ।।इतिश्रीगोविंदाश्रमपादपूज्यशिष्यश्रीकैवल्याश्रमविरचितासौं
दर्यलहर्याःसौभाग्यवर्द्धनीटीकासमाप्ता।। ।।ॐ नंदिग्रामभैरवकेस्यविप्रस्य।।
संवत्१९२०वर्षेनभस्यासितपक्षेचतुर्थ्यांगुरुवासरे।।[illegible]लिखवंस
तःशोधयंत्वसदत्रयत्।। ।।श्री।। ।। ।।ॐ।। ।।श्री।। ।।श्री।।